योजितार्थ-लौकिक प्रमाण के बल पर अधिगत विषय में शक्तिग्रह तो हो जायगा, किन्तु अत्यन्त अनुपलब्ध देवता आदि अर्थों में संकेत-ग्रह कैसे होगा ? ॥ २६१ ॥

संकेतयिता का स्मरण न होने से भी शब्दार्थ-सम्बन्ध सांकेतिक नहीं कहा जा सकता—

अपि च कर्त्तुरनुस्मरणं भवेद्
यदि चकार पुमान् समयं गिराम् ।
न खलु कर्तृगबुद्धिबलं विना
व्यवहृतिर्भवति व्यवहर्त्तरि ॥ २६२ ॥

योजना—अपि च यदि पुमान् गिरां समयं चकार, कर्त्तुः अनुस्मणं भवेत्, व्यवहर्त्तरि व्यवहृतिः कर्तृगबुद्धिबलं विना न खलु भवति ॥ (द्रुतविलम्बितम्) ॥

योजितार्थ—यदि किसी पुरुष ने शब्दों का संकेत किया होता, तो उस कर्ता का अनुस्मरण होता, क्योंकि व्यवहर्त्ता व्यक्ति का व्यवहार कर्तृ विषक स्मरण के बिना नहीं होता ॥ २६२ ॥

इसी भाव को दृष्टान्त के द्वारा स्फुट करते हैं—

न खलु पाणिनिपिङ्गलसंज्ञया
व्यवहरन्ति तयोः स्मरणं विना ।
पदपदार्थपरस्परसंगतिं
निरमिमीत ततो न जगद्गुरुः ॥ २६३ ॥

योजना—पाणिनिपिङ्गलसंज्ञया तयोः स्मरणं विना व्यवहरन्ति न खलु, ततः जगद्गुरुः पदपदार्थसंगतिं निरमिमीत न ॥ (द्रुतविलम्बितम्) ॥

योजितार्थ—पाणिनि-कृत (वृद्धि गुण आदि) तथा पिङ्गलकृत (मगण आदि) संज्ञाओं के द्वारा उनका स्मरण किये विना व्यवहार नहीं किया करते, अतः परमेश्वर ने पद-पदार्थ की संगति का निर्माण नहीं किया

भावितार्थ—शबरस्वामी ने कहा है—"यदा हि पुरुषः कृत्वा सम्बन्धं व्यवहारयेत्, व्यवहारकाले अवश्यं स्मर्त्तव्यो भवति, संप्रतिपत्तौ हि कर्तृव्यवहर्त्रोरर्थः सिद्धयति न विप्रतिपत्तौ, न हि वृद्धिशब्देन अपाणिनेर्व्यवहारतः आदैचः प्रतीयेरन्, तथा मकारेणापिङ्गलस्य सर्वगुरुस्त्रिकः प्रतीयते" (शा० भा० १।१।५) अर्थात् यदि कोई संकेतयिता पुरुष शब्दार्थ-सम्बन्ध की रचना करता, तो उन शब्दों के व्यवहार-काल में अवश्य स्मर्तव्य होता । 'वृद्धि' शब्द से 'आत्' और 'ऐच्' का व्यवहार करते समय पाणिनि का

स्मरण करना अनिवार्य है, सर्वगुरु वर्णों के त्रिक में मगण व्यवहार करते समय पिङ्गल का स्मरण आवश्यक है। ऐसे ही कोई वैदिक शब्दार्थ का कर्त्ता होता, तो अवश्य वैदिक व्यवहार के समय स्मर्तव्य होता, किन्तु ऐसा स्मरण कभी होता नहीं, अतः आद्य संकेतयिता पुरुष का अभाव मानना पड़ता है ॥ २६३ ॥

वैशेषिक-सम्मत ईश्वरानुमान की शंका करते हैं—

मतिमतां प्रवरो वृषभध्वजः
कणभुगादिमुनिप्रवरप्रभुः ।
ननु धरादिजगद्रचनाबलाद्
अनुमितोऽनवखण्डितशक्तिकः ॥ २६४ ॥

योजना—ननु मतिमतां प्रवरः, कणभुगादिमुनिप्रवरप्रभुः, अनवखण्डितशक्तिकः वृषभध्वजः धरादिजगद्रचनाबलाद् अनुमितः ॥ (द्रुतविलम्बितम्) ॥

योजितार्थ—शंका होती है कि बुद्धिमानों का शिरमौर (सर्वज्ञ), कणाद आदि मुनिवरों का उपास्य, अखण्डशक्ति-समन्वित भगवान् वृषभध्वज (शंकर) पृथिवी आदि जगत् की रचना के बल पर अनुमित होता है (फिर उसका अभाव क्योंकर सिद्ध होगा ? वही शब्दार्थों का संकेतयिता है) ॥ २६४ ॥

उक्त अनुमान-साधन में इष्टापत्ति करते हैं—

अपि तु वैदिकवाङ्मनसातिगा-
नुदितलुप्तचिदेकरसात्प्रभोः ।
अभवदानकदुन्दुभिनन्दनात्
अमतिपूर्वमिदं सकलं जगत् ॥ २६५ ॥

योजना—(तस्मादीश्वरादपि न बुद्धिपूर्वं जगद्रचना जाता) अपितु वैदिकवाङ्मनसातिगानुदितलुप्तचिदेकरसात् प्रभोः आनकदुन्दुभिनन्दनात् अमतिपूर्वम् इदं सकलं जगत् अभवत् ॥ (द्रुतविलम्बितम्) ॥

योजितार्थ—उस ईश्वर से भी बुद्धिपूर्वक जगद्रचना नहीं हुई, अपितु वैदिक वाक् और मन के अविषयभूत, उदय-अस्त-रहित चैतन्यैकरस, प्रभुवर वसुदेव-नन्दन से अबुद्धिपूर्वक यह सकल जगत् हुआ है ॥

भावितार्थ—उक्त ईश्वरानुमान हमें भी इष्ट है किन्तु उस ईश्वर से जगत् की रचना बुद्धिपूर्वक नहीं हुई, यह हम कह चुके हैं, अतः वेद में पौरुषेयत्व सम्भावित नहीं ॥२६५॥

वेद में वाक्यत्व लिङ्ग के द्वारा पौरुषेयत्व के अनुमान का सन्देह किया जाता है—

ननु लौकिकवचसां नरमतिपूर्वकरचना
परिदृश्यत इति वैदिकवचसामनुमिनुमः ।
वचनं श्रुतिशिरसामपि नरधीकृतरचनं
वचनत्वत इव लौकिकजननिर्मितवचनम् ॥ २६६ ॥

योजना—ननु लौकिकवचसां नरमतिपूर्वकरचना परिदृश्यते इति वैदिकवचसाम् अनुमिनुमः श्रुतिशिरसां वचनम् अपि नरधीकृतरचनं वचनत्वतः लौकिकजननिर्मितवचनं इव।।

योजितार्थ—लौकिक वचनों की पुरुष-बुद्धिपूर्वक रचना देखी जाती है, इसलिए वैदिक वचनों में भी (उसका) अनुमान कर लेते हैं—वेदान्त-वचन पुरुष-बुद्धि-रचित हैं, वचन होने के कारण, जैसे लौकिक वचन ।। २६६ ।।

उक्त अनुमान से विवक्षित ईश्वर-सिद्धि का अनुवाद करके निराकरण करते हैं —

न च मादृशजनधीकृतरचनं श्रुतिवचनं
भवितुं क्षममिति वैदिकरचनाबलमिषतः ।
अनुमीयत इह शूलभृदिति चेदिदमशुभं
नहि वैदिकवचसामभिभवनास्पदमनुमा ॥ २६७ ॥

योजना—श्रुतिवचनं मादृशजनधीकृतरचनं च न भवितुं क्षमम्, इति इह वैदिकरचनामिषतः शूलभृत् अनुमीयते इति चेत्, इदम् अति अशुभम्, हि अनुमा वैदिकवचसाम् अभिभवनास्पदं न ।।

योजितार्थ—श्रुतिवचन हमारे जैसे साधारण मनुष्यों की बुद्धि से रचित नहीं हो सकता, इसलिए यहाँ वैदिक रचना के व्याज से (बहाने) त्रिशूल-धारी (शकर) का अनुमान किया जाता है—ऐसा यदि कहें, तो यह अति अशुभ होगा, क्योंकि अनुमान (कभी) वैदिक वचनों का अभिभावक (बाधक) नहीं होता ।।

भावितार्थ—प्रत्यक्षादि के आधार पर व्याप्ति का निश्चय हो जाने के अनन्तर ही अनुमान प्रवृत्त होता है, अतः सापेक्ष प्रवृत्तिक है और वैदिक वचन सदैव अन्य प्रमाणों से अनधिगत अर्थ का बोधक होने से निरपेक्ष प्रवृत्तिक हैं, इसलिए अनुमान कभी भी वैदिक वचन का बाधक नहीं हो सकता ।। २६७ ।।

अनुमान से अबाधित होकर वैदिक वचन अनुमान का बाधक हो जाता है—

ब्रह्म स्वयम्भु परमात्मपदस्य वेदो
निःश्वासकल्प इति चापरमामनन्ति ।
वाक्यं तदस्य मतिपूर्वकतानुमानं
सद्यो निरस्यति न चेदपबाधितं स्यात् ॥ २६८ ॥

योजना—ब्रह्म स्वयंभु, वेदः परमात्मपदस्य निःश्वासकल्पः, इति च अपरं वाक्यम् आमनन्ति, तत् चेत् अपबाधितं न स्यात् अस्य मतिपूर्वकतानुमानं सद्यः निरस्यति ।। (वसन्ततिलका) ।।

योजितार्थ—"ब्रह्म स्वयंभु" (बृह० २।६।३) अर्थात् वेद स्वयंभु है तथा "अस्य महतो भूतस्य निःश्वसितम्" (बृह० २।४।१०) अर्थात् वेद इस महान् ईश्वर के निःश्वास हैं—यह दूसरा वैदिक वाक्य है वह यदि अनुमान से बाधित नहीं, तब इस (वेद) में प्रसक्त बुद्धिपूर्वकता का निरास अवश्य कर देगा ।।

भावितार्थ—वैदिक वाक्य वेद को स्वयंभु आदि शब्दों से कहा करते हैं, इससे यह अत्यन्त स्पष्ट होजाता है कि वेदों की रचना पुरुष-बुद्धि-कृत नहीं, फिर तो यही वैदिक

वचन उक्त अनुमान के बाधक हो जाते हैं, आगम से बाधित अनुमान अपनें अर्थ का कदापि साधक नहीं हो सकता ॥ २६८ ॥

केवल वेद ही नहीं, समस्त जगत् की रचना अबुद्धिपूर्वक है—

सृजति रक्षति संहरति प्रभुः
सकलमेव निविश्य नियच्छति ।
अमतिपूर्वमिति श्रुतिशासने
वद कथं मतिपूर्वकतानुमा ॥ २६९ ॥

योजना-प्रभुः मतिपूर्वं सकलम् एव सृजति, रक्षति, संहरति, निविश्य नियच्छति-इति श्रुतिशासने, वद मतिपूर्वकतानुमा कथम् ?

योजितार्थ—ईश्वर अबुद्धिपूर्वक ही सकल जगत् का सर्जन, रक्षण, संहार करता एवं सब में प्रविष्ट होकर नियमन करता है—ऐसे श्रुति शासन के रहने पर बताइए (वेद में) बुद्धिपूर्वकता का अनुमान कैसे होगा ?

भावितार्थ—वेदान्त सिद्धान्त में कूटस्थ चैतन्यस्वरूप ईश्वर स्वतः ही जगत् की रचना कर सकता है, किसी अन्य आगन्तुक कारण की अपेक्षा नहीं "इन्द्रो मायाभिः पुरुरूप ईयते" (बृह० २।५।१९) आदि श्रुतियों तथा "मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्" (गी० ९।१०) आदि स्मृतियों में केवल माया या अविद्या या प्रकृति को ही जगत् की रचना में द्वार माना है, अतः बुद्धिपूर्वकत्व जगत्-रचना में सिद्ध नहीं होता ॥२६९॥

आप्त-रचितत्व भी वेदगत प्रामाण्य का प्रयोजक नहीं हो सकता—

आप्तोक्तत्वप्रत्यये मानभावो
वेदस्यास्य ज्ञायते मानभावे ।
विज्ञाते सत्याप्तपूर्वत्वसिद्धिः
इत्यन्योन्यापाश्रयत्वप्रसङ्गः ॥ २७० ॥

योजना-आप्तोक्तत्वप्रत्यये अस्य वेदस्य मानभावो ज्ञायते, मानभावे विज्ञाते सति आप्तपूर्वत्वसिद्धिः अन्योऽन्यापाश्रयत्वप्रसङ्गः ॥ (शालिनी) ॥

योजितार्थ—(वेद में) आप्तोक्तत्व का निश्चय हो जाने पर प्रामाण्य का ज्ञान होगा, प्रामाण्य का ज्ञान हो जाने पर आप्तोक्तत्व प्रसक्त होता है ॥ २७० ॥

अतः वेद में प्रामाण्य निश्चय स्वतः ही मानना चाहिए—

तस्मादेषा स्वप्रयुक्तप्रमाण-
भावज्ञाना वेदविद्याभ्युपेया ।
प्रामाण्यं स्यात्स्वप्रयुक्तं च तस्या
वस्तुस्थित्या ज्ञप्तिवन्नान्यतस्तत् ॥ २७१ ॥

योजना—तस्मात एषा वेदविद्या स्वप्रयुक्तप्रमाणभावज्ञाना अभ्युपेया, तस्याः प्रामाण्यं वस्तुस्थित्या स्वप्रयुक्तं च स्यात् ज्ञप्तिवत्, अन्यतः तत् न ॥ (शालिनी) ॥

योजितार्थ—इसलिए यह वेद विद्या का स्वतः प्रामाण्य-स्फुरण मानना चाहिए,

उसका प्रामाण्य वस्तुतः स्वतः उत्पन्न भी होता है, जैसे कि ज्ञान स्वतः होता है, परतः नहीं।

भावितार्थ—वेद-वाक्य-जन्य ज्ञान में प्रमात्व जैसे स्वतः ज्ञात होता है, वैसे स्वतः उत्पन्न भी होता है, अर्थात् ज्ञान की उत्पादक सामग्री से ही ज्ञानगत प्रमात्व उत्पन्न होता है और ज्ञान की ग्राहक सामग्री से ही ज्ञानगत प्रमात्व गृहीत (प्रकाशित) होता है प्रमात्व की उत्पत्ति और ज्ञप्ति (प्रकाश) में और-सामग्री की अपेक्षा नहीं ॥ २७१ ॥

प्रमात्व की उत्पत्ति और ज्ञप्ति के समान ही व्यवहृति भी स्वतः ही होती है—

ज्ञप्त्युत्पत्त्योर्यद्वदेव प्रवृत्तौ
अस्या युक्ता मानता स्वप्रयुक्ता ।
वेदोत्थाया बुद्धिवृत्तेर्न हीयम्
उत्पत्त्यन्यत् संविदे काङ्क्षतीति ॥ २७२ ॥

योजना—अस्याः वेदोत्थायाः बुद्धिवृत्तेः यद्वत् ज्ञप्त्युत्पत्त्योः, एवम् प्रवृत्तौ मानता स्वप्रयुक्ता युक्ता, इयम् उत्पत्त्यन्यत् संविदे न हि काङ्क्षति ॥ (शालिनी) ॥

योजितार्थ—इस वेद-जन्य बुद्धि-वृत्ति की जैसे ज्ञप्ति और उत्पत्ति में (स्वतः मानता है) वैसे ही प्रवृत्ति में भी मानता स्वाधीन ही युक्तियुक्त है, यह (वेदविद्या) अपनी उत्पत्ति से भिन्न को अपने संवेदनादि में नहीं चाहती ॥

भावितार्थ—जैसे घटादि उत्पन्न होते हैं ज्ञात होते हैं और जलादि के आनयनादि व्यवहार में उपयुक्त होते हैं, वैसे ही ज्ञानगत प्रमात्व उत्पन्न होता है, ज्ञात होता है और प्रवृत्ति-निवृत्ति आदि व्यवहार में उपयुक्त होता है। प्रमात्व न तो अपनी उत्पत्ति में ज्ञानोत्पादक से अन्य हेतु की अपेक्षा करता है, न अपने प्रकाश में ज्ञानप्रकाशक से अन्य, और न अपने व्यवहार में ज्ञान-व्यवहारक से भिन्न किसी हेतु की अपेक्षा करता है, अतः उसकी उत्पत्ति, ज्ञप्ति और व्यवहृति में सर्वथा स्वतस्त्व ही माना जाता है ॥ २७२ ॥

वेद-रचना में बुद्धिपूर्वकत्व-अनुमान के निराकरण का उपसंहार करते हैं—

विश्वं विष्णोरुत्थितं नामरूपं
निःश्वासादिप्रख्यमित्याह वेदः ।
यत्तत्तथ्यं वर्त्मना वर्णितेन
तस्मान्मिथ्या पौरुषेयानुमानम् ॥ २७३ ॥

योजना—नामरूपं विश्वं निःश्वासादिप्रख्यं विष्णोः उत्थितम् इति यद् वेदः आह, तत् वर्णितेन वर्त्मना तथ्यम्, तस्मात् पौरुषेयानुमानं मिथ्या ॥ (शालिनी) ॥

योजितार्थ–नामरूपात्मक विश्व निःश्वास के समान विष्णु से उत्पन्न हुआ–यह जो वेद कहता है, वह पूर्वोक्त रीति से सत्य ही है, अतः पौरुषेयता का अनुमान मिथ्या है ।२७३।

अतः हमारे मत में स्वतः प्रामाण्य का विरोध किसी प्रकार नहीं होता—

परिणामविवर्तयोरतः
परिक्लृप्तावपि वेदगोचरः ।
न च चोद्यरवोऽपि विद्यते
कथितेनैव पथाऽनपेक्षितः ॥ २७४ ॥

योजना—अतः परिणामविवर्त्तयोः परिक्लृप्तौ अपि वेदगोचरः चोद्यलवोऽपि न विद्यते, कथितेन एव पथा अनपेक्षितः ।। (सुन्दरीच्छन्दः) ।।

योजितार्थ—अतः परिणाम और विवर्त्त के सिद्धान्त में वेद के विषय में आक्षेप की गन्ध भी नहीं रही, क्योंकि कथित रीति से वह निराकृत हो गया है ।। २७४।।

तत्त्वंपदार्थशोधनम्

प्रासङ्गिक आक्षेप का परिहार करके तत्त्वंपदार्थों में हेयोपादेय का विवेक करने के लिए चार विभाग करते हैं—

उपाधिमौपाधिकमान्तरं चि-
दाभासनं चित्प्रतिबिम्बकं च ।
चिद्बिम्बमेवं चतुरः पदार्थान्
विविच्य जानीहि तदर्थभाजः ॥ २७५ ॥

योजना—उपाधिम्, आन्तरम् औपाधिकं चिदाभासनम्, चित्प्रतिबिम्बकम्, चिद्बिम्बम् एवं चतुरः तदर्थभाजः पदार्थान् विविच्य जानीहि ।। (उपजाति) ।।

योजितार्थ—उपाधि, औपाधिक चिदाभास, चित्प्रतिबिम्ब तथा चिद्बिम्ब–ये चार तत्पदार्थ-सम्बन्धी पदार्थों को विवक्तरूप से जानो ।।

भावितार्थ–तत्पदार्थ वस्तुस्वरूप को समझने के लिए उपाधि, औपाधिक अभासन, प्रतिबिम्ब एवं बिम्ब के स्वरूपों का जानना आवश्यक है ।। २७५ ।।

त्वम्पदार्थ में भी वैसे ही चार विभाग हैं—

तथा त्वमर्थेऽपि चतुष्टयं तद्
विवेचनीयं निपुणेन भूत्वा ।
मतिश्चिदाभासनमेवमस्यां
बिम्बं तदीयं प्रतिबिम्बकं च ॥ २७६ ॥

योजना—तथा त्वमर्थेऽपि तत् चतुष्टयं निपुणेन भूत्वा विवेचनीयम्–मतिः अस्यां चिदाभासनम्, बिम्बम्, तदीयं प्रतिबिम्बकं च ।। (उपजाति) ।।

योजितार्थ–उसी प्रकार त्वम्पदार्थ में भी वे चार विभाग सावधानता से विवेचनीय हैं—मति (उपाधि), इसमें चिदाभास, बिम्ब तथा उसका प्रतिबिम्ब ।। २७६ ।।

तत्पदार्थगत विभाग दिखाते हैं—

उपाधिरज्ञानमनादिसिद्धम्
अस्मिश्चिदाभासनमीश्वरत्वम् ।
तदन्विता चित्प्रतिबिम्बकं स्याद्
उदीर्यते शुद्धचिदेव बिम्बम् ॥ २७७ ॥

योजना—अनादिसिद्धम् अज्ञानम् उपाधिः, अस्मिन् चिदाभासनम् ईश्वरत्वम्, तदन्विता चित् च प्रतिबिम्बकं स्यात्, शुद्धचित् एव बिम्बम् उदीर्यते ।। (उपजाति) ।।

योजितार्थ—(तत्पदार्थ में) अनादि सिद्ध अज्ञान ही उपाधि है, इस (उपाधि) में चिदाभासन ही 'ईश्वर' पद का प्रवृत्ति-निमित्त है, आभास-युक्त चेतन ईश्वररूप प्रतिबिम्ब तथा शुद्ध चेतन बिम्ब कहा जाता है ॥ २७७ ॥

त्वम्पदार्थ में चारों दिखाते हैं—

उपाधिरन्त:करणं त्वमर्थे
जीवत्वमाभासनमत्र तद्वत् ।
तदन्विता चित्प्रतिबिम्बमेवम्
अनन्वितां तामिह बिम्बमाहुः ॥ २७८ ॥

योजना—त्वमर्थे अन्तःकरणम् उपाधिः, तद्वत् अत्र आभासनं जीवत्वम्, तदन्विता चित् प्रतिबिम्बम्, एवम् इह अनन्वितां तां बिम्बम् आहुः ॥ (उपजाति) ॥

योजितार्थ—त्वंपदार्थ में अन्तःकरण उपाधि है, वैसे ही इसमें आभासन जीवत्व है, उससे युक्त चेतन जीवरूप प्रतिबिम्ब हैऔरइसमेंअनन्वित चेतन कोबिम्ब कहते हैं ॥२७८॥

कथित विभागों में हेय-उपादेय बताते हैं—

उपाधिना सार्धमुपाधिजन्यम्
औपाधिकं सर्वमवेहि मिथ्या ।
भागं मृषा चित्प्रतिबिम्बकेऽपि
बिम्बं पुनः सत्यमशेषमेव ॥ २७९ ॥

योजना—उपाधिना सार्धम् उपाधिजन्यम् औपाधिकं सर्वं मिथ्या अवेहि, चित्प्रतिबिम्बके अपि भागं मृषा, बिम्बं पुनः अशेषमेव सत्यम् (अवेहि) ॥ (उपजाति) ॥

योजितार्थ—उपाधि के साथ उपाधि-जन्य औपाधिक को पूर्णतया मिथ्या समझो, चित्प्रतिबिम्ब में भी (आभास) भाग को मिथ्या तथा बिम्ब को पूर्णतया सत्य जानो ॥

भावितार्थ—उक्त चतुर्विध भेदों में उपाधि (अज्ञान या अन्तःकरण) सर्वथा मिथ्या ही है। उपाधिगत चिदाभास भी उपाधि-जन्य होने से मिथ्या है। प्रतिबिम्ब में चेतन भाग सत्य और आभास भाग मिथ्या है। बिम्ब चेतन तो पूर्णशः सत्य है ॥ २७९ ॥

लौकिक दृष्टान्त में भी चारों विभाग घटाते हैं—

अप्पात्रमप्पात्रगतत्वमेवम्
अप्पात्रगोऽप्पात्रगताद्बहिष्ठ ।
दिवाकरो दिव्यवतिष्ठमानो
न शक्यतेऽपोहितुमिद्धतेजाः ॥ २८० ॥

योजना—अप्पात्रम्, अप्पात्रगतत्वम्, अप्पात्रगः, एवम् अप्पात्रगताद् बहिष्ठः दिवि अवतिष्ठमानः इद्धतेजाः दिवाकरः अपोहितुं न शक्यते ॥ (उपजाति) ॥

योजितार्थ—जल-पात्र, जलपात्रगतत्व, जलपात्रगत (प्रतिबिम्ब) एवं जलपात्र के बाहर आकाश में अवस्थित प्रचण्ड मार्तण्ड का अपलाप नहीं किया जा सकता ॥

भावितार्थ—सजल घट उपाधि है, प्रतिबिम्ब में प्रतीयमान सजलघटगतत्व आभास है, उससे युक्त सूर्य प्रतिबिम्ब होता, आकाशस्थ रवि बिम्ब है, यह सर्वथा अबाधित और सत्य है ।। २८० ।।

दार्ष्टान्तिक में भी वैसा ही है—

पुरं पुरःस्थत्वमथो पुरःस्थं
पुराद्बहिः शुद्धमवस्थितं च ।
तथा परं ब्रह्म सुसूक्ष्मयाऽपि
धिया निराकर्त्तुमशक्यमेव ॥ १८१ ॥

योजना—पुरम्, पुरस्थत्वम् अथो पुरस्थं तथा पुराद् बहिः अविस्थितं शुद्धं परं ब्रह्म सुसूक्ष्मया धिया अपि निराकर्त्तुम् अशक्यमेव ।। (उपेन्द्रवज्रा) ।।

योजितार्थ—शरीरादि (उपाधि) शरीरस्थत्व (आभासन) शरीरस्थ (प्रतिबिम्ब) तथा शरीर से बाहर स्थित शुद्ध परब्रह्मरूप बिम्ब अत्यन्त सूक्ष्म बुद्धि से भी निराकरण के अयोग्य है ।। २८१ ।।

ब्रह्म की निर्विशेषता का निरूपण उपसंहृत करते हैं—

न स्थानतोऽप्यस्ति परस्य तस्माद्
विशेषयोगः परमार्थरूपः ।
स्वतः पुनर्दूरनिरस्तमेव
परस्य तत्त्वस्य विशेषवत्त्वम् ॥ २८२ ॥

इस पद्य की योजना योजितार्थ और भावितार्थ के लिए इसी अध्याय का १४६ वाँ पद्य देखें ।। २८२ ।।

ब्रह्म की निर्विशेषरूपता में अन्य युक्ति देते हैं—

श्रुतेश्च तात्पर्यमखण्डरूपे
पुरे पुरस्तादुपपादितं च ।
ततोऽपि तस्याद्वयरूपतोऽन्यद्
रूपान्तरं कल्पयितुं न शक्यम् ॥ २८३ ॥

योजना—श्रुतेः च तात्पर्यं परे अखण्डरूपे पुरस्ताद् उपपादितम्, ततोऽपि तस्य अद्वयरूपतः अन्यद् रूपान्तरं कल्पयितुं न शक्यम् ।। (उपजाति) ।।

योजितार्थ—श्रुति का तात्पर्य परम निर्विशेष तत्त्व में पहले कहा गया है, इसलिए भी उस अद्वयरूप से भिन्न रूप की कल्पना नहीं की जा सकती ।।

भावितार्थ—"अरूपवदेव हि तत्प्रधानत्वात्" (ब्र० सू० ३।२।१४) इस सूत्र में सूत्रकार ने जिन श्रुतियों की ओर संकेत किया है, उनके आधार पर समस्त वेदान्त का तात्पर्य निर्विशेष ब्रह्म में जब स्थिर होता है, तब उसमें रूपान्तर की कल्पना कर ही कैसे सकते हैं ? ।। २८३ ।।

भेद-प्रतिपादक श्रुतियों का स्वार्थ में तात्पर्य नहीं—

भेदश्रुतिस्त्वन्यपरा समस्ता
समस्तवेदेषु न तत्पराऽसौ ।
अतत्परा तत्परवेदवाक्यैः
विरुध्यमाना गुणवाद एव ॥ २८४ ॥

योजना—समस्तवेदेषु समस्ता भेदश्रुतिः तु अन्यपरा, असौ तत्परा न, अतत्परा तत्परवेदवाक्यैः विरुध्यमाना गुणवाद एव ॥ (उपजाति) ॥

योजितार्थ—समस्त वेदों में समग्र भेद-प्रतिपादक वाक्य तो (स्तुति आदि) अन्य अर्थ के सूचक हैं, वे स्वार्थपरक नहीं, ऐसे अतत्परक वाक्य स्वार्थपरक अद्वैत-बोधक श्रुतियों से विरुद्ध होने के कारण गुणवाद (अर्थवाद) ही माने जाते हैं ॥ २८४ ॥

भेद-बोधक वाक्यों से अभेद-बोधक वाक्यों का बाध नहीं हो सकता—

न ह्यर्थवादा विधिभिर्विरुद्धा
विध्यर्थसंकोचकरा भवन्ति ।
किन्तु प्रधानानुगुणं यदेषाम्
आलम्बनं तत्खलु कल्पनीयम् ॥ २८५ ॥

योजना—विधिभिः विरुद्धा अर्थवादा विध्यर्थसंकोचपरा न हि भवन्ति, किन्तु यद् एषां प्रधानानुगुणम्, तद् आलम्बनम्, खलु कल्प्यताम् ॥ (इन्द्रवज्रा) ॥

योजितार्थ—विधि वाक्यों के साथ विरोध रखनेवाले अर्थवाद कभी विध्यर्थ के संकोचक नहीं होते, किन्तु जो इन (अर्थवादों) का विध्यर्थ के अनुगुण (विषय) है, वह आलम्बन (प्रतिपाद्य) कल्पनीय होता है ॥

भावितार्थ—विधिवाक्य शेषी (अङ्गी) और अर्थवाद वाक्य शेष (अङ्ग) कहलाते हैं, सदैव शेषी के अनुकूल ही शेष का अर्थ किया जाता है। इसलिए जो अर्थ विधिवाक्यों का विरोधी नहीं, वही अर्थ लक्षणादि वृत्ति के द्वारा अर्थवादों का निकालना होगा। प्रकृत में "द्वा सुपर्णा" आदि भेद-बोधक वाक्यों का भी वही अर्थ निकालना होगा, जो अभेद-बोधक वाक्यों के अनुकूल हो ॥ २८५ ॥

इस अर्थ में पूर्वमीमांसा का दृष्टान्त देते हैं—

यथा ह्यजक्षीरविधेः समीपे
यज्जर्तिलादेः परिकीर्त्तनं तत् ।
प्रधानसंकोचभयादपास्य
स्वमर्थमासीद् गुणवाद एव ॥ २८६ ॥

योजना—यथा हि अजक्षीरविधेः समीपे यत् जर्तिलादेः संकीर्तनम्, तत् प्रधानसंकोचभयात् स्वम् अर्थम् अपास्य स्तुत्यर्थं गुणवाद एव आसीत् ॥ (उपजाति) ॥

योजितार्थ— जैसे कि अजा-क्षीर की विधि के समीप जो जर्तिलादि का संकीर्तन है,

वह प्रधान विधि के संकोच के भय से स्वार्थपरक न मानकर स्तुति के लिए अर्थवाद ही माना गया है ॥

भावितार्थ–"न चेदन्यं प्रकल्पयेत् प्रक्लृप्तार्थवादः स्यादानर्थक्यात् परसामर्थ्याच्च" (जै० सू० १०।८।७) इस सूत्र में विचार किया गया है कि "जर्तिलयवाग्वा वा जुह्याद् गवेधुकयवाग्वा वा, अनाहुतिर्वै जर्तिलाश्च गवेधुकाश्चेत्यजक्षीरेण जुह्यात्" यहाँ पर एक ही कर्म में जर्तिल (जंगली तिल), गवेधुक (जंगली गेहूँ) का संकीर्तन करके अजा-क्षीर का विधान किया है। यहाँ सन्देह होता है कि जर्तिलादि का प्रतिपादक वाक्य विधि है ? या अर्थवाद ? पूर्वपक्षी नें कहा है कि जर्तिल-वाक्यों में भी 'जुह्यात्' विधि-प्रत्यय का उल्लेख है, अतः यह वाक्य भी विधि है। इस पूर्वपक्ष का निराकरण करते हुए सिद्धान्ती ने कहा है कि उसी कर्म में जर्तिलादि का भी विधान करने से अजा-क्षीर रूप मुख्य द्रव्य के साथ उनका विकल्प मानना होगा, विकल्प में आठ दोष होते हैं एवं अजा-क्षीर-विधि का भी संकोच (पाक्षिक विधान) करना पड़ेगा, अतः जर्तिलादि वाक्य अर्थवाद मात्र हैं ॥ २८६ ॥

वैसे ही प्रकृत में भी मानना होगा—

एवं सतीहापि विरुद्ध्यमानं
वचो यदद्वैतपरैर्वचोभिः ।
तदस्तु गौणं यदि वा परस्य
मायाप्रसूतद्वयवादिमुख्यम् ॥ २८७ ॥

योजना—एवं सति इहापि यद् अद्वैतपरैः वचोभिः विरुध्यमानम्, तद् गौणम् अस्तु यदि वा परस्य मायाप्रसूतद्वयवादिमुख्यम् ॥ (उपजातिवृत्तम्) ॥

योजितार्थ—ऐसा (अर्थवाद वाक्यों से प्रधान के अनुगुण अर्थ का प्रतिपादन) मानने पर यहाँ भी जो अद्वैत-परक वाक्यों से विरुद्ध अर्थ का प्रतिपादन करता है, वह गौण माना जाय, या परब्रह्म-सम्बन्धी माया-जन्य द्वैत का बोधक होकर मुख्य ही रहे ॥

भावितार्थ—अद्वैतार्थक वाक्यों के विरोधी द्वैतावगाही वाक्यों की दो अवस्थाएँ हो सकती हैं—(१) उनका मुख्य वृत्ति से स्वार्थ में तात्पर्य न मानकर गौणी वृत्ति से स्तुत्यादि अर्थों में तात्पर्य माना जाय, या कि (२) यदि उन्हें मुख्यार्थक ही रखना है, तब मायिक द्वैतभाव का प्रतिपादन उनसे माना जा सकता है ॥ २८७ ॥

भेद-श्रुति वास्तविक भेद को विषय नहीं कर सकती—

भेदश्रुतिः कल्पितमेव भेदम्
आलम्ब्य मुख्यार्थवती भवित्री ।
अतत्परा तत्परवाक्यभङ्ग-
स्त्वितोऽन्यथा याति विना निमित्तम् ॥ २८८ ॥

योजना—भेदश्रुतिः अतत्परा कल्पितं भेदम् एव आलम्ब्य मुख्यार्थवती भवित्री, इतो अन्यथा तत्परवाक्यभङ्गः विना निमित्तं याति ॥ (उपजाति) ॥

योजितार्थ-भेद-श्रुति तत्परक नहीं, अतः कल्पित भेद को ही विषय करके मुख्यार्थक होती है, अन्यथा तत्परक वाक्यों का बिना किसी निमित्त के ही बाध हो जाता है ॥२८८॥

उपासना-विधि-बोधित सविशेष तत्त्व मिथ्या क्यों ? इसका उत्तर है—

यदपि किंचिदुपासननिष्ठिताद्
वचनतः प्रतिभाति परात्मनः ।
सकलगन्धरसादिमयं वपुः
तदपि कल्पितभेदसमाश्रयम् ॥ २८९ ॥

योजना—उपासननिष्ठितात् वचनात् यत् परमात्मनः किञ्चित् सकलगन्धरसादिमयं वपुः प्रतिभाति, तदपि कल्पितभेदसमाश्रयम् ।। (द्रुतविलम्बितम्) ।।

योजितार्थ—उपासना-परक वचन से जो परब्रह्म का कुछ सकल गन्धादिमय स्वरूप प्रतीत होता है, वह भी कल्पित भेद पर ही आधृत है ।।

भावितार्थ—"सर्वगन्धः सर्वरसः" आदि उपासना-परक वाक्य भी कल्पित भेद को ही विषय करते हैं, वास्तविक भेद को नहीं, क्योंकि वह अत्यन्त असम्भावित है ।। २८९ ।।

सगुण-वाक्यों के अनुरोध से निर्गुण वाक्यों का अन्यथा नयन सम्भव नहीं—

न खलु निर्गुणवस्तुपरं वचः
सगुणवाक्यविरोधनिमित्ततः ।
स्वविषयादपसारयितुं बलाद्
अतिबलिष्ठपदान्वयमिष्यते ॥ २९० ॥

योजना—अतिबलिष्ठपदान्वयं निर्गुणवस्तुपरं वचः सगुणवाक्यविरोधनिमित्ततः स्वविषयाद् बलाद् न अपसारयितुम् इष्यते (द्रुतविलम्बितम्) ।।

योजितार्थ-अति बलिष्ठ पदों से समन्वित, निर्गुण वस्तु के बोधक वचन सगुणवाक्यों के विरोधरूप निमित्त के आधार पर अपने विषय से बलपूर्वक नहीं हटाये जा सकते ।।

भावितार्थ—तात्पर्य-ग्राहक षड्विध लिङ्गों से समस्त वेदान्त का तात्पर्य एक निर्गुण वस्तु के प्रतिपादन में अवसित होता है, अतः निर्गुणार्थक पद अत्यन्त बलिष्ठ माने जाते हैं, उन पदों से अन्वित वाक्य भी सबल तथा मुख्यार्थक होते हैं, इसलिए गौणार्थक भेदवादी वाक्यों के विरोध में निर्गण वाक्यों का अन्यथा अर्थ करना सर्वथा अन्याय्य है ।। २९० ।।

तत्पदार्थ-शोधन का उपसंहार करते हैं—

तस्मात्तत्परवेदवाक्यगतिभिर्न्यायेन चाऽऽत्मप्रभं
सर्वद्वैतविवर्जितं विगलितध्वान्तं शिवं शाश्वतम् ।
प्रत्यग्रूपमरूपमरूपगन्धरसकं तच्छब्दवाच्यं स्थितं
वाक्यार्थान्वयि लक्षितं भगवतो विष्णोः पदं गृह्यताम् ॥२९१॥

योजना-तस्मात् तत्परवेदवाक्यगतिभिः न्यायेन च आत्मप्रभम्, सर्वद्वैतविवर्जितम्, विगलितध्वान्तम्, शाश्वतम्, प्रत्यग्रूपम्, अरूपगन्धरसकम्, शिवं तच्छब्दवाच्यं स्थितम् वाक्यार्थान्वयी भगवतः विष्णोः पदं लक्षितं गृह्यताम् ।। (शार्दूलविक्रीडितम्) ।।

योजितार्थ—इसलिए तत्परक वेदवाक्यों के अर्थबोधन-प्रकारों के द्वारा मिथ्यात्व-साधक न्यायों की सहायता से स्वयंप्रकाश, सर्वद्वैत-रहित, अनावृत, शाश्वतः, प्रत्यगात्मा, रूपगन्धरस से रहित, शिव 'तत्' शब्द का वाच्य निर्णीत होता है ॥

भावितार्थ—'तत्' शब्द का वाच्य अर्थ विशिष्ट है और 'तत्' पद का लक्ष्य है—शुद्ध ब्रह्म, वह शुद्ध ब्रह्म महावाक्यों के द्वारा ही अभिलक्षित होता है ॥ २९१ ॥

शोधित 'तत्' पद के लक्ष्यार्थ में प्रमाण देते हैं—

अशब्दमस्पर्शमरूपमव्ययं
तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महदः परं ध्रुवं
निचायनीयं वदमीदृशं हरेः ॥ २९२ ॥

योजना—यत् नित्यम् अशब्दम्, अस्पर्शम्, अरूपम्, अव्ययं तथा अरसम्, अगन्धवत् च, ईदृशम् अनाद्यनन्तम् महतः परं हरेः ध्रुवं पदं निचायनीयम् ॥ (वंशस्थम्) ॥

योजितार्थ-जो नित्य, शब्दादि-रहित, अव्यय तथा रसगन्ध आदि से शून्य है, ऐसा आदि-अन्त-रहित महत्तत्त्व से परे भगवान् का ध्रुव पद निश्चेतव्य है ।

भावितार्थ-कठोपनिषत् (१।१५) में 'तत्' पद के लक्ष्य तत्त्व का स्पष्ट उल्लेख हुआ है । वहाँ अव्यय का अर्थ गुणावयवनिमित्तक व्यय से रहित निर्गुण निरवयव है । शब्दाद्युपलक्षित पञ्चभूतों से व्यावृत्त करने में हेतु अनाद्यनन्त है, आदि और अन्तरूप दो विकारों का निषेध हो जाने से मध्यपाती 'अस्ति' आदि शेष चार विकारों का भी निराकरण हो जाता है । 'महान्' का शब्दार्थ होता है—बुद्धितत्त्व, यहाँ बुद्ध्युपाधिक जीव को महान् कहा गया है, उससे पर तत्पद-लक्ष्य है । अथवा "महतः परम्" । का अव्यक्त-व्यावृत्त अर्थ में भी तात्पर्य हो सकता है । 'ध्रुवम्' से कूटस्थ नित्यता अभिहित है। उस परमतत्त्व को अपना रूप निश्चय करके ही जीव मृत्यु-मुख से छूट सकता है ॥ २९२ ॥

दूसरा मन्त्र दिखाते हैं—

भोक्ता भोग्यं प्रेरितारं च मत्वा
सर्वं प्रोक्तं त्रिविधं ब्रह्म मे तत् ।
जीवेशानौ सृज्यमानं जगच्च
शुद्धं ब्रह्मेत्याह वेदान्तवाक्यम् ॥ २९३ ॥

योजना—भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं तत् त्रिविधं ब्रह्म मे प्रोक्तम् । जीवेशानौ सृज्यमानं जगत् शुद्धं ब्रह्म च—इति वेदान्तवाक्यम् आह ॥ (शालिनी) ॥

योजितार्थ—भोक्ता, भोग्य और प्रेरक का मनन करके सब-कुछ त्रिविध ब्रह्म मैंने कहा है । जीव, ईश्वर, सृज्यमान जगत् और शुद्ध ब्रह्म—इस प्रकार वेदान्त-वाक्य ने कहा है॥

भावितार्थ—श्वेताश्वतरोपनिषत् के उक्त (१।१२) मन्त्र के 'भोक्ता' पद की प्रथमा विभक्ति द्वितीयार्थ में प्रयुक्त हुई है, अर्थात् जीव, जगत् और ईश्वर के स्वरूपों का विचार करने से यही स्थिर होता है कि वे सब ब्रह्मस्वरूप हैं, उससे भिन्न कुछ भी नहीं ॥२९३॥

केवल पदार्थ-बोध पर्याप्त नहीं—

पदार्थबोधेन कृतार्थता न ते
मतिः परोक्षा हि पदार्थगोचरा ।
अतो महावाक्यनिबन्धनैव धीः
अबोधविच्छेदकरी भविष्यति ॥ २९४ ॥

योजना—पदार्थबोधेन हि ते कृतार्थता न, हि पदार्थगोचरा मतिः परोक्षा; अतः महावाक्यनिबन्धना धीः एव अबोधविच्छेदकरी भविष्यति ॥ (वंसस्थवृत्तम्) ॥

योजितार्थ—(हे शिष्य !) केवल पदार्थ-बोध से ही तेरी कृतार्थता नहीं होती, क्योंकि पदार्थविषयक बुद्धि परोक्ष होती है, अतः महावाक्य-जन्य बोध ही अज्ञान का विच्छेदकारी होगा ॥

भावितार्थ—यद्यपि शोधित तत्पदार्थ ब्रह्म की प्रत्यक्स्वरूपता का निश्चय पहले हो जाता है, तथापि 'तत्' और 'त्वम्' पदों में नपुंसक और पुंलिङ्ग का प्रयोग होने से उक्त निश्चय परोक्ष ही होता है, वाक्यार्थ-बोध ही अपरोक्ष होता है, वही अज्ञान का निवर्तक होगा ॥२९४॥

महावाक्य से भी सहसा अपरोक्ष बोध नहीं होता—

स्वाध्यायधर्मपठितं निजवेदशाखा-
वेदान्तभूमिगतमादरपालितं च ।
संन्यासिना परदृशा गुरुणोपदिष्टं
साक्षान्महावचनमेव विमुक्तिहेतुः ॥ २९५ ॥

योजना—निजवेदशाखावेदान्तभूमिगतं स्वाध्यायधर्मपठितम् आदरपालितं च सन्यासिना परदृशा गुरुणा उपदिष्टं महावचनम् एव साक्षात् मुक्तिहेतुः ॥ (वसन्ततिलका) ॥

योजितार्थ—अपनी वेद-शाखा के वेदान्त भाग में आया हुआ, स्वाध्याय-मर्यादा से पठित और सादर परिपालित, सन्यासी तत्त्वदर्शी गुरु के द्वारा उपदिष्ट महावाक्य ही साक्षात् मोक्ष का हेतु होता है ॥

भावितार्थ—जो महावाक्य अपनी शाखा में आया हो, विधिपूर्वक स्वाध्याय के द्वारा प्राप्त किया हो, श्रद्धापूर्वक दीर्घ समय तक आराधित हो, फिर श्रोत्रिय ब्रह्मनिष्ठ आचार्य के द्वारा उपदिष्ट हो, वही साक्षात् अपरोक्ष-बोध उत्पन्न करता है, सामान्य महावाक्य नहीं ॥

महावाक्य से मुक्तिफलक साक्षात्कार उत्पन्न होने में प्रमाण दिखाते हैं—

नावेदविद्धि मनुते पुरुषं बृहन्तम्
इत्याह वेदवचनं कथमन्यथैतत् ।
वाक्यान्तरं च कथमाह पुमांसमेनं
साटोपमौपनिषदत्वविशेषणेन ॥ २९६ ॥

योजना—बृहन्तं पुरुषम् हि अवेदवित् न मनुते—इति वेद वचनम् आह, एतत् अन्यथा कथम् ? वाक्यान्तरं च साटोपम् औपनिषदत्वविशेषणेन एनं पुमांसं कथम् आह ? (वसन्त०)

योजितार्थ—बृहत् पुरुष को वेदान्तवाक्यार्थानभिज्ञ नहीं जान सकता—इस प्रकार वेद-वचन कहता है, यह अन्यथा कैसे होगा ? दूसरा वाक्य भी गर्वपूर्वक औपनिषदत्व विशेषण लगाकर इस पुरुष को कैसे कहेगा ?

भावितार्थ—भगवान् वेद कहता है–"नावेदवित् मनुते तं बृहन्तम्" (तै० ब्रा० ३।१२।९।७) अर्थात् वेदान्तवाक्य के अर्थ से अनभिज्ञ व्यक्ति उस ब्रह्मतत्त्व को हृदयङ्गम नहीं कर सकता। इसी प्रकार दूसरे स्थान पर भी कहा है–"तं त्वौपनिषदं पुरुषं पृच्छामि" (बृह० ३।९।२६)। अर्थात् उस औपनिषद् पुरुष को पूछता हूँ, यहाँ ब्रह्म का विशेषण औपनिषद् रखा है, औपनिषद का अर्थ होता है—केवल उपनिषत्-वाक्य के द्वारा ज्ञायमान, फिर तो वह तत्त्व और किसी प्रकार ज्ञात ही कैसे होगा ? ॥ २९६ ॥

उक्त वचनों में वेद और उपनिषत् पदों से महावाक्य ही विवक्षित है—

उपनिषदिति वेद इत्यपीदं
समभिवदन्ति महावचो महान्तः।
फलवदवगतिः स्यादन्तरेणैतदेकं
वचनमिति न शक्यं वक्तुमित्यादरोऽस्मिन् ॥ २९७ ॥

योजना—महान्तः उपनिषदिति वेद इत्यपि इदं महावचः समभिवदन्ति, एतत् एकं वचनम् अन्तरेण फलवदवगतिरिति कथं वक्तुं शक्यम् ? इति अस्मिन् आदरः ॥ (पुष्पिताग्रा) ॥

योजितार्थ—आचार्यगण 'उपनिषत्' और 'वेद' पदों से इस महावाक्य को ही कहा करते हैं; क्योंकि इस एक वाक्य को छोड़कर सफल साक्षात्कार होगा, यह कैसे कहा जा सकता है, इसलिए इस महावाक्य में इतना आदर है ॥

भावितार्थ—उक्त वाक्यों में 'उपनिषत्' तथा 'वेद' पदों से बाध्य होकर महावाक्यों का ग्रहण करना पड़ता है, क्योंकि महावाक्यों के बिना और किसी प्रकार भी ब्रह्म का साक्षात्कार नहीं हो सकता ॥ २९७ ॥

अतः 'उपनिषत्' और 'वेद' शब्द ही यहाँ प्रधान है—

उपनिषदिति शब्दो वेदशब्दश्च तस्मात्
श्रुतिशिरसि निविष्टो योज्यतामत्र वाक्ये।
अपरमखिलमस्यैवाङ्गभूतत्वहेतोः
इह समभिनिविष्टं तद्गिरो वाच्यमासीत् ॥ २९८ ॥

योजना—तस्मात् श्रुतिशिरसि निविष्टः उपनिषदिति शब्दः वेदशब्दश्च अत्र वाक्ये योज्यताम्, अस्यैव अङ्गभूतत्वहेतोः इह समभिनिविष्टम् अपरम् अखिलम् अस्यैव तद्गिरः वाच्यम् आसीत् ॥ (मालिनी) ॥

योजितार्थ—इसलिए वेदान्तगत 'उपनिषत्' और 'वेद' शब्द इस महावाक्य के अर्थ में जोड़ लेने चाहिए, इस (महावाक्य) का अङ्ग होने के कारण वेदान्त-निविष्ट और भी समस्त अर्थ इसी शब्द का वाच्य है ॥

भावितार्थ–"उप=समीपे प्रत्यगात्मानम् अव्यवधानेन गमयति" तथा "ब्रह्म प्रत्यगात्मत्वेन वेदयति"–इन व्युत्पत्तियों से 'उपनिषत्' और 'वेद' दोनों शब्द महावाक्य के ही बोधक होते हैं, अभेद से अतिरिक्त अर्थों में भी 'वेद' 'उपनिषत्' शब्दों का व्यवहार इसलिए हो जाता है कि वह अर्थ इसी अभेद का अङ्ग होता है ॥ २९८ ॥

"तत्त्वमसि" आदि महावाक्यों की साक्षात् तत्त्व-बोधकता में लिङ्ग दिखाते हैं—

पित्रा तत्त्वमसीति बोधनमनु स्पष्टं विजज्ञाविति
च्छान्दोग्ये यदवोचदेतदिह नो लिङ्गं भवेज्ज्ञापकम् ।
सर्वत्रैव महागिरामुपनिषच्छब्दो भवेद्ग्राहको
वेदश्चायमतोऽन्यदस्य निकटे तेनात्र वेदादिगीः ॥ २९९ ॥

योजना—पित्रा तत्त्वमसीति बोधनम् अनु "विजज्ञौ"—इति स्पष्टं छान्दोग्ये यद् अवोचत्, एतद् इह नो ज्ञापकं लिङ्गं भवेत् । सर्वत्रैव महागिरां ग्राहकः 'उपनिषत्' शब्दो भवेत्, अयं वेदश्च । अतोऽन्यद् अस्य निकटम्, तेन अत्र वेदादिगीः ।। (शार्दूलविक्रीडितम्) ॥

योजितार्थ—पिता के द्वारा "तत्त्वमसि"—ऐसा बोध देने के अनन्तर "तद्धाऽस्य विजज्ञौ" (छां० ६।७।६) ऐसा स्पष्टरूप से छान्दोग्य में जो कहा है, यही इस (महावाक्य की तत्त्व-बोधकता) में हमारा ज्ञापक हेतु है । सर्वत्र महावाक्य का ग्राहक 'उपनिषत्' शब्द है और 'वेद' शब्द भी । इस (महावाक्य) से अन्य वेद-भाग इसके निकट है, इसलिए उसमें भी 'वेद' आदि शब्दों का प्रयोग हो जाता है ॥

भावितार्थ—'उपनिषत्', 'वेद'—दोनों शब्दों का अर्थ होता है – तत्त्व-बोधक, "तत्त्वमसि" आदि महावाक्य ही वस्तुतः तत्त्व के बोधक होते हैं; क्योंकि छान्दोग्य उपनिषत् के छठे अध्याय में श्वेतकेतु के पिता ने जब "तत्त्वमसि"—इस महावाक्य का उपदेश किया, उसके अनन्तर श्रुति कहती है–"तद्धादस्य विजज्ञौ (छां० ६।७।६) अर्थात् उस तत्त्व का बोध श्वेतकेतु को हो गया । इससे यह अत्यन्त दृढ़ हो जाता है कि महावाक्य ही तत्त्व के बोधक होते हैं, अतः 'उपनिषत्' और 'वेद' शब्द मुख्यरूप से महावाक्यों को ही कहते हैं, अन्य भाग उसके निकट है, अतः वेदादि शब्दों का प्रयोग उसमें भी हो जाता है ।। २९९ ॥

'उपनिषत्' शब्द का महावाक्य में प्रवृत्ति-प्रकार दिखाते हैं—

उपनिषद्वचसा परमात्मधीः
सहजशक्तिवशेन निगद्यते ।
तदुपचर्यं महागिरि वर्तते
निकटभावमपेक्ष्य तु मुख्यगीः ॥ ३०० ॥

योजना—उपनिषद् वचसा सहजशक्तिवशेन परमात्मधीः निगद्यते, महागिरि तु निकटभावम् अपेक्ष्य उपचर्यं मुख्यगीः वर्तते ।। (द्रुतविलम्बितम्) ॥

योजितार्थ—'उपनिषत्' शब्द अपनी स्वाभाविक शक्ति के द्वारा ब्रह्मज्ञान को कहता है, महावाक्य में तो निकटता के कारण उपचार से प्रवृत्त होता है ॥

भावितार्थ—'उपनिषत्' शब्द अपनी अवयवगत शक्ति से ब्रह्मज्ञान को कहता है, ब्रह्मज्ञान का बोधक होने से महावाक्य भी 'उपनिषत्' शब्द का लक्षणा आदि से अर्थ माना जाता है, अर्थात् ब्रह्मज्ञान के वाचक महावाक्य को भी ब्रह्मज्ञान समझकर उपनिषत् शब्द की प्रवृत्ति बन जाती है ।। ३०० ॥

उक्त अर्थ को ही विशद करते हैं—

उपनिषद्वचसाऽभिहिताऽऽत्मधी।
निकटवर्तिमहागिरि मुख्यवत् ।
उपनिषद्वचनं तदवान्तरे
वचसि गौणवदत्र विवक्ष्यते ॥ ३०१ ॥

योजना—उपनिषद्वचसा अभिहिता आत्मधीः निकटवर्तिमहागिरि मुख्यवत्, तदवान्तरे वचसि उपनिषद्वचनं गौणवद् अत्र विवक्ष्यते ॥ (द्रुतविलम्बितम्) ॥

योजितार्थ—'उपनिषत्' शब्द से अभिहित आत्मज्ञान अपने निकटवर्ती महावाक्य में मुख्यरूप से, अवान्तर वाक्य में 'उपनिषत् शब्द गौणरूप से यहाँ विवक्षित है ॥

भावितार्थ—यद्यपि महावाक्य में 'उपनिषत्' शब्द औपचारिकरूप से ही प्रवृत्त है, तथापि बहुतर प्रयोग से उपचार भी मुख्य के समान ही हो जाता है, अतः यह कहा जानें लगा कि 'उपनिषत्' शब्द का महावाक्य मुख्य अर्थ है, अवान्तर वाक्य गौण अर्थ ॥३०१॥

पूर्वोक्त लिङ्ग का ही स्मरण दिलाते हैं—

यतो महावाक्यत एव पुत्रो
विजज्ञिवानस्य पितुः सकाशात् ।
इति श्रुतं तेन स एव वेदः
तथा च सैवोपनिषच्च सिद्धा ॥ ३०२ ॥

योजना—यत् पुत्रः अस्य पितुः सकाशात् महावाक्यतः एव विजज्ञिवान्—इति श्रुतम्, तेन स एव वेदः तथैव सैव उपनिषत् च सिद्धा ॥ (उपेन्द्रवज्रा) ॥

योजितार्थ—पुत्र (श्वेतकेतु) ने अपने पिता के मुख से महावाक्य को सुनकर ही आत्मबोध प्राप्त किया—ऐसा श्रुति ने कहा है, इसलिए वही वेद है और वही उपनिषत् भी सिद्ध होता है ॥ ३०२ ॥

व्यतिरेक मुख से भी उक्तार्थ को दृढ़ करते हैं—

विना महावाक्यमतो न कश्चित्
पुमांसमद्वैतमवैति जन्तुः ।
ततः पदार्थावगमान्न मुक्तिः
घटिष्यते तस्य परोक्षभावात् ॥ ३०३ ॥

योजना—अतः कश्चित् जन्तुः महावाक्यं विना अद्वैतं पुमांसं न अवैति, ततः पदार्थावगमात् मुक्तिः न घटिष्यते, परोक्षभावात् ॥ (उपेन्द्रवज्रा) ॥

योजितार्थ—इसलिए कोई जीव महावाक्य के बिना अद्वैत पुरुष को नहीं जान सकता, अतः पदार्थ के ज्ञानमात्र से मुक्ति नहीं घटती, क्योंकि वह परोक्ष हैं ॥

भावितार्थ—महावाक्य के घटक पदों को सुनकर परोक्ष बोध होता हैं, अतः उससे मुक्ति नहीं होती, अपितु महावाक्य-श्रवण के अनन्तर ही अपरोक्ष बोध होता है, जिससे मुक्ति होती है ॥ ३०३ ॥

तब पदार्थ-शोधन किस लिए ? इसका उत्तर है—

पदार्थबोधं परिहृत्य वाक्यं
न शक्तमात्मानुभवावसानाम् ।
धियं समानेतुमपेक्षितत्वाद्
अतः स यत्नेन निरूपितोऽभूत् ॥ ३०४ ॥

योजना—पदार्थबोधं परिहृत्य वाक्यम् आत्मानुभवावसानां धियं समानेतुं न शक्तम्, अपेक्षितत्वात्, अतः स यत्नेन निरूपितोऽभूत् ॥ (उपेन्द्रवज्रा) ॥

योजितार्थ—पदार्थ-बोध को छोड़कर वाक्य आत्मसाक्षात्कार-विषयिणी बुद्धि को जन्म नहीं दे सकता, क्योंकि वह अपेक्षित है, अतः वह (पदार्थ) यत्न से निरूपित हुआ है ॥

भावितार्थ—वाक्यार्थ-बोध में पदार्थ-बोध कारण होता है, अतः वाक्यार्थ-बोध के लिए पदार्थों का पहले ही निरूपण परम आवश्यक था, इसलिए पदार्थ-शोधन पूर्व किया गया है ॥ ३०४ ॥

वाक्यार्थ-ज्ञान में अपेक्षित पदार्थ दिखाते हैं—

तच्छब्दादवगतमद्वितीयमासीत्
प्रत्यक्त्वं समधिगतं त्वमित्यनेन ।
प्रत्यक्त्वं न खलु विनाऽद्वितीयमेवं
नाद्वैतं भवितुमलं विना प्रतीचा ॥ ३०५ ॥

योजना—'तत्' शब्दात् अद्वितीयम् अवगतम् आसीत्, 'त्वम्'—इत्यनेन प्रत्यक्त्वं समधिगतम् । न अद्वितीयं विना प्रत्यक्त्वम्, न विना प्रतीचा अद्वैतम् भवितुम् अलम् ॥ (प्रहर्षिणी) ॥

योजितार्थ—'तत्' शब्द से अद्वितीय ब्रह्म अवगत हुआ और 'त्वम्'—इस पद से प्रत्यक्त्व ज्ञात हुआ । न तो अद्वितीयत्व के विना प्रत्यक्त्व और न प्रत्यक्त्व के विना अद्वितीयत्व हो सकता है ॥

भावितार्थ—पदार्थों का शोधन कर लेने पर पदार्थों (वाच्यार्थों) में से विरोधी अंशों का त्याग कर अवशिष्ट अर्थों का तादात्म्य सम्यक् सम्पन्न हो जाता है ॥ ३०५ ॥

तर्क के समय प्रतीयमान पदार्थभेद वाक्य से स्फुट होता है—

तर्कप्रतीतिसमयेऽपि तदद्वितीयं
प्रत्यक् परिस्फुरति तत्प्रतिबिम्बितं सत् ।
वेदान्तवाक्यजनिताऽद्वयबुद्धिभूमि-
निष्ठं पुनः स्फुटतरं भवतीति भेदः ॥ ३०६ ॥

योजना-तर्कप्रतीतिसमयेऽपि तत् अद्वितीयं प्रत्यक् तत्प्रतिबिम्बितं सत् परिस्फुरति, वेदान्तवाक्यजनिताऽद्वयबुद्धिभूमिनिष्ठं पुनः स्फुटतरं भवतीति भेदः ॥ (वसन्त०) ॥

योजितार्थ—तर्क-प्रतीति के समय भी वह अद्वितीय प्रत्यक् आत्मा उस (प्रतीति) में प्रतिबिम्बित होकर परिस्फुरित होता है, किन्तु वेदान्त-वाक्य-जन्य बुद्धि में तो अत्यन्त स्फुट हो जाता है—यह उनमें भेद है ॥

भावितार्थ—अपनी ऊहा से समस्त अनात्म जगत् का निरास कर देने पर भी अद्वितीय आत्मतत्त्व का स्फुरण हो जाता है, किन्तु वह परोक्षमात्र होता है, महावाक्य-जन्य वृत्ति में वह अद्वितीय अखण्ड तत्त्व प्रत्यक्ष हो जाता है ॥ ३०६ ॥

तर्क-जन्य और वाक्य-जन्य बुद्धियों का वैलक्षण्य दिखाते हैं—

अधममध्यमशुद्धिनि दर्पणे
परमशुद्धिनि चाऽऽननमात्मनः ।
तरतमक्रमतः प्रतिभासते
तदिव तत्त्वमिह प्रतिपत्तिषु ॥ ३०७ ॥

योजना—यद्वत् अधममध्यमशुद्धिनि परमशुद्धिनि च दर्पणे आत्मनः आननं तरतम-क्रमतः प्रतिभासते, तदिव इह प्रतिपत्तिषु तत्त्वम् ॥ (द्रुतविलम्बितम्) ॥

योजितार्थ—जैसे अधम, मध्यम और उत्तम शुद्धिवाले दर्पण में अपना मुख तरतम-क्रम से प्रतिभासित होता है, वैसे ही यहाँ बुद्धि-वृत्तियों में तत्त्व ॥

भावितार्थ—जैसे मलिन दर्पण में अपना मुख मलिन, स्वच्छ दर्पण में स्वच्छ और स्वच्छतम दर्पण में मुख अत्यन्त स्वच्छ दीखता है, वैसे ही बुद्धि-वृत्तियों के तारतम्य से आत्मतत्त्व के प्रतिभान में अन्तर पड़ जाता है, अर्थात् वृत्ति जितनी ही स्वच्छ होगी, उसमें उतना ही स्वच्छ आत्मतत्त्व प्रतीत होगा ॥ ३०७ ॥

बुद्धिगत तारतम्य का कारण दिखाते हैं—

एकदेशमुपलभ्य धर्मिणः
चैकदेशमपरं विजानते ।
धर्मिधीव्यवधिकारणादतो
नानुमा ह्यनुभवाय वस्तुनः ॥ ३०८ ॥

योजना—धर्मिणः एकदेशम् उपलभ्य अपरम् एकदेशं विजानते, अतः धर्मिधीव्यव-धिकारणात् अनुमा वस्तुनः अनुभवाय न (प्रभवति) ॥ (रथोद्धता) ॥

योजितार्थ—पक्ष के एक (व्याप्यावच्छिन्न) देश को देखकर दूसरे एक (व्यापकाव-च्छिन्न) देश का अनुमान किया करते हैं, अतः पक्ष-धी का व्यवधान होने के कारण अनु-मान वस्तु का साक्षात्कार कराने में नहीं समर्थ होता ॥

भावितार्थ—शबरस्वामी ने अनुमान का लक्षण किया है—"ज्ञातसम्बन्धस्यैकदेश-दर्शनाद् एकदेशान्तरे बुद्धिरनुमानम् ।" अर्थात् ज्ञात है हेतु का सम्बन्ध जिसमें, ऐसे पक्ष-रूप धर्मी के एक धूम-विशिष्ट देश को देख कर उसी के अग्नि-विशिष्ट देश की कल्पना का नाम अनुमान है। यहाँ अनुमेय अग्नि या अग्नि-विशिष्ट देश इन्द्रिय-सन्निकृष्ट नहीं, अतः व्यवहित है, व्यवहित वस्तु का ज्ञान कभी प्रत्यक्ष नहीं होता। इस प्रकार यह सिद्ध होता है कि तर्क या अनुमान के आधार पर किसी वस्तु का साक्षात्कार नहीं हो सकता, तत्त्वसाक्षात्कार के लिए महावाक्य की उपासना अनिवार्य है ॥ ३०८ ॥

गुरु अपने शिष्य की पूर्व जिज्ञासा को पूर्णतया शान्त करके दूसरी जिज्ञासा उठाता है—

एवं तावत्तत्त्वमर्थौ विशुद्धौ
बोद्धव्यं चेदन्यदप्यस्ति पृच्छ ।
यद्यद् बुद्धं तत्तदादाय तिष्ठेः
यच्चाबुद्धं तत्र चाऽऽधत्स्व चेतः ॥ ३०९ ॥

योजना--एवं तावत् तत्त्वमर्थौ विशुद्धौ । अन्यत् चेद बौद्धव्यम् अस्ति, इति पृच्छ ! यद् यद् बुद्धम्, तत तत् आदाय तिष्ठेः, यत् च अबुद्धम्, तत्र चेतः आधत्स्व ॥ (शालिनी) ॥

योजितार्थ—इस प्रकार 'तत्' और 'त्वम्' के अर्थों का शोधन किया गया । और यदि कुछ बोद्धव्य है, तो पूछो ! जो जान गये, वह ध्यान में रक्खो, जो नहीं समझे, उसके लिए चित्त को समाहित करो ॥ ३०९ ॥

शिष्य की प्रवृत्ति दिखाते हैं—

बुद्ध्वा तत्त्वम्पदार्थानुभवविषयं कर्त्तुकामस्तदैक्यं
वाक्याद् वाक्यार्थनिष्ठात् श्रुतिशिरसि गतादञ्जसा तत्त्वमादेः ।
तच्छेषापन्नमस्मिन् श्रुतिशिरमि वचोजातमन्यद् यदस्ति
तस्येयत्ताबुभुत्साकुलितनिजमतिः पृच्छति स्मैष भूयः ॥३१०॥

योजना—एवं तत्त्वम्पदार्थौ बुध्वा वाक्यार्थनिष्ठात् श्रुतिशिरसि गतात् तत्त्वमादेः वाक्यात् तदैक्यं अञ्जसा अनुभवविषयं कर्त्तुकामः अस्मिन् श्रुतिशिरसि तच्छेषापन्नं यत् अन्यद् वचोजातम् अस्ति, तस्येयत्ताबुभुत्साकुलितनिजमतिः भूयः पृच्छति ॥ (स्रग्धरा) ॥

योजितार्थ—यह शिष्य तत्त्वम्पदार्थों को जानकर वाक्यार्थ-बोधक, वेदान्तगत, 'तत्त्वमसि' आदि वाक्यों से उन दोनों पदार्थों की एकता को भली प्रकार अनुभव में लाने की कामना से इस वेदान्त में उस (महावाक्य) के शेषभूत जो अन्य वचन हैं, उनकी इयत्ता (परिमाण) की जिज्ञासा से व्याकुल होकर फिर पूछता है ॥

भावितार्थ—महावाक्यार्थ का बोध तत्त्वम्पदार्थ-शोधन पर निर्भर है, तत्त्वम्पदार्थ-शोधन अवान्तर वाक्यों पर आश्रित है, अतः अवान्तर वाक्यों के प्रकार की जिज्ञासा उठाई जाती है ॥ ३१० ॥

अवान्तरवाक्येयत्ताजिज्ञासा

प्रश्न दिखाया जाता है—

अद्याप्यवान्तरवचः परिमाणबोध-
वैकल्यमस्ति मम तेन महावचोऽपि ।
वाक्यार्थबुद्धिमनुभूतिफलावसानां
नोत्पादयत्यहरहः श्रुतमप्यशक्तेः ॥ ३११ ॥

योजना-अद्यापि मम अवान्तरवचः परिमाणबोधवैकल्यम् अस्ति, तेन अहरहः श्रुतो महावचोऽपि अनुभूतिफलावसानां वाक्यार्थबुद्धि न उत्पादयति, अशक्तेः ॥ (वसन्त०) ॥

योजितार्थ-अभी भी मेरे अन्दर अवान्तर वाक्यों के इयत्ता-बोध का अभाव है, इसलिए प्रतिदिन श्रुत भी महावाक्य अनुभवरूप फल तक पहुँचनेवाली वाक्यार्थ-बुद्धि को नहीं उत्पन्न करता, क्योंकि उसकी शक्ति नहीं ॥ ३११ ॥

उक्त प्रश्न का ही स्पष्टीकरण करते हैं—

विधिमुखेन परस्य निवेदकं
वचनजातमवान्तरसंज्ञितम् ।
यदपि भेदनिषेधमुखेन तत्
परिमितिं प्रतिपादय मे प्रभो ॥ ३१२ ॥

योजना—प्रभो ! विधिमुखेन परस्य निवेदकम् अवान्तरसंज्ञितं वचनजातम्, यदपि भेदनिषेधमुखेन (परस्य निवेदकम्); तत्परिमितिं मे अद्य प्रतिपादय ॥ (द्रुतविलम्बितम्) ॥

योजितार्थ—गुरो ! जो विधिमुख से परब्रह्म के बोधक अवान्तरसंज्ञक वाक्य हैं और जो निषेधमुख से ब्रह्म के बोधक हैं, उनकी इयत्ता मुझे आज सुनाइए ॥ ३१२ ॥

अवान्तरवाक्येयत्तानिरूपणम्

गुरु उक्त जिज्ञासा को शान्त करता है—

सकलवेदशिरःसु परात्मधी-
परवचःसु परापरबोधतः ।
अपुनरुक्तपदान्युपसंहरन्
परिमितिं स्वयमेव तु वेत्स्यति ॥ ३१३ ॥

योजना—सकलवेदशिरःसु परात्मधीपरवचःसु अपुनरुक्तपदानि परापरबोधतः उपसंहरन् स्वयमेव परिमितिं वेत्स्यसि ॥ (द्रुतविलम्बितम्) ॥

योजितार्थ-(हे शिष्य ;) सकल वेदान्त ग्रन्थों में परमात्मपरक वाक्यों के अपुनरुक्त पदों का परापर-बोध के भेद से उपसंहार करके स्वयं ही परिमाण का ज्ञान तुम करलोगे ॥

भावितार्थ-परमात्मबोधक समस्त अपुनरुक्त पदों को दो विभागों में बांट देना चाहिए—(१) सगुणपरक और (२) निर्गुणपरक । इस प्रकार इयत्ता का स्वयं अवधारण हो सकता है ॥ ३१३ ॥

उपसंहार की आवश्यकता बताते हैं—

अपुनरुक्तपदानि विना यतो
न परिपुष्कलबुद्धिसमुद्भवः ।
अपुनरुक्तपदानि ततस्ततः
त्वमुपसंहर तत्त्वबुभुत्सया ॥ ३१४ ॥

योजना—यतः अपुनरुक्तपदानि विना परिपुष्कलबुद्धिसमुद्भवो नास्ति, ततः तत्त्वबुभुत्सया त्वम् अपुनरुक्त पदानि उपसंहर ॥ (द्रुतविलम्बितम्) ॥

योजितार्थ—अपुनरुक्त पदों के (उपसंहार के) बिना पूर्ण बोध नहीं होता, अतः तत्त्व-बोध की इच्छा से तुम अपुनरुक्त पदों का उपसंहार करो ॥

भावितार्थ—समस्त शाखाओं के समस्त निर्गुणपरक अपुनरुक्त पदों का जब तक संकलन नहीं किया जाता, तब तक अभीष्ट तत्त्व का पूर्ण परिचय प्राप्त नहीं हो सकता, अतः सभी उपयोगी विशेषणों को उपयुक्त विशेष्य की परिधि में केन्द्रित कर देना चाहिए ॥ ३१४ ॥

उपसंहार में किसी प्रकार का प्रमाद नहीं आने देना चाहिए—

कुरु परापरवाक्यविवेचनं
तदनुशब्दसमाहरणं कुरु ।
प्रियशिरःप्रभृतीनि च यत्नवान्
उपचितापचितानि परित्यज ॥ ३१५ ॥

योजना—परापरवाक्यविवेचनं कुरु, तदनु शब्दसमाहरणं कुरु, उपचितापचितानि प्रियशिरःप्रभृतीनि यत्नवान् परित्यज ॥ (द्रुतविलम्बितम्) ॥

योजितार्थ—परब्रह्म-बोधक और अपरब्रह्म-बोधक वाक्यों का पहले विवेचन करो, तदनन्तर विशेषण पदों का उपसंहार करो, हाँ उपचित-अपचितरूप प्रियं शिरः आदि (असंगत) विशेषणों का यत्नपूर्वक परित्याग कर देना चाहिए ॥

भावितार्थ—निर्गुण के प्रकरण में स्थित अनुपयुक्त विशेषणों का परित्याग आवश्यक है, जैसे "तस्य प्रियमेव शिरः" (तै० २।५।१) यहाँ वर्णित प्रिय, मोद और प्रमोद-रूप वृत्तियाँ व्यवस्थित नहीं, क्योंकि प्राणियों के भेद से उक्त वृत्तियों में न्यूनाधिकभाव होता है, ऐसे अव्यवस्थित विशेषण नित्यैकरस कूटस्थ के साथ संगत नहीं होते, अतः इनका सम्बन्ध निर्गुण तत्त्व के साथ कदापि स्थिर नहीं किया जा सकता ॥ ३१५ ॥

उक्त विशेषणों की परित्यज्यता में हेतु दिखाते हैं—

उपचितापचितानि न निर्गुणे
प्रियशिरःप्रभृतीनि कदाचन ।
निपुणधीरपि कश्चन योजयेद्
अपि तु कोशगुणाः कथिता अमी ॥ ३१६ ॥

योजना—उपचितापचितानि प्रियशिरःप्रभृतीनि निर्गुणे कश्चन निपुणधीः अपि कदाचन न योजयेत्, अपितु अमी कोशगुणाः कथिताः (द्रुतविलम्बितम्) ॥

योजितार्थ—उपचित अपचितरूप प्रियशिरः आदि विशेषणों को निर्गुण तत्त्व में कोई निपुण व्यक्ति भी कदापि नहीं जोड़ सकता, (वे निर्गुण के विशेषण नहीं) अपितु वे पाँच कोशों के धर्म हैं ॥

भावितार्थ—प्रियशिरस्त्व आदि वस्तुतः कोशों के धर्म हैं, कोशों के द्वारा निर्गुण ब्रह्म के अभिलक्षक होने में निर्गुण के प्रकरण में उनका पाठ समीचीन हो जाता है ॥३१६॥

विधिवाक्यों की इयत्ता दिखाकर निषेधवाक्यों की इयत्ता दिखाते हैं—

इति वचः परिमाणमुदीरितं
विधिवचःसु निषेधगिरां शृणु ।
बहुनिषेध्यममूष्वपि तेन ता-
स्वपि समाहर पूर्ववदेव तत् ॥ ३१७ ॥

योजना—इति विधिवचःसु परिमाणम् उदीरितम्, निषेधगिरां शृणु, अमूषु बहुनिषेध्यम् अस्ति, तेन तासु अपि पूर्ववदेव तत् समाहर ॥ (द्रुतविलम्बितम्) ॥

योजना—यद् किञ्चिद् इह अबोधसमुद्भवम्, तद् अखिलं निषधगीः केवलं प्रतिषेधति, न तु किमपि उपगृह्य भगवतः परे पदे निविशेत ॥ (द्रुतविलम्बितम्) ॥

योजितार्थ—जो कुछ इस (आत्मा) में अबोध-जनित रूप है, उस समस्त रूप का निषेधवाक्य केवल प्रतिषेध कर देता है, न कि कुछ विधेयरूप लेकर भगवान् के परम पद में समर्पित करता है ॥ ३२० ॥

विधि-निषेध के वैलक्षण्य-निरूपण का उपसंहार करते हैं—

इति विशेष इह प्रतिपादितो
विधिनिषेधगिरोरुभयोरपि ।
अपुनरुक्तपदाहरणं पुनः
विधिनिषेधवचःस्वविशेषितः ॥ ३२१ ॥

योजना—इति उभयोः विधिनिषेधगिरोः इह विशेषः प्रतिपादितः, अपुनरुक्तपदाहरणं पुनः विधिनिषेधवचःसु अविशेषितम् ॥ (द्रुतविलम्बितम्) ॥

योजितार्थ—इस प्रकार दोनों विधि-निषेध वाक्यों की यहाँ विशेषता कह दी है, अपुनरुक्त पदों का उपसंहार तो विधि-निषेध वाक्यों में समान ही है ॥ ३२१ ॥

विधि और निषेध वाक्यों में यह भी एक अन्तर है कि निषेध वाक्य अपने घटक निषेध्य से अतिरिक्त निषेध्य के भी अजहल्लक्षणा के द्वारा निषेधक हैं, किन्तु विधिवाक्य ऐसे नहीं, वे केवल श्रुत अर्थ के ही विधायक होते हैं, अश्रुत के नहीं—

श्रुतिपदैरुपसंहृतिशालिभिः
यदवशिष्टनिषेध्यनिषेधनम् ।
तदपि पूर्वमिहाभिमतं श्रुतेः
श्रुतपदान्युपलक्षणमेव हि ॥ ३२२ ॥
समुपसंहृतशब्दसमन्वितैः
श्रुतिपदैर्विधिवाक्यगतैः पुनः
समुपलक्ष्यतया न परात्मनः
किमपि रूपमिहाऽभ्यधिकं मतम् ॥ ३२३ ॥

योजना—उपसंहृतशालिभिः श्रुतपदैः यद् अवशिष्टनिषेध्यनिषेधनम्, तद् अपि इह पूर्वम् अभिमतम्; श्रुतेः हि श्रुतपदानि उपलक्षणमेव समुपसंहृतशब्दसमन्वितैः विधिवाक्यगतैः श्रुतपदैः पुनः परात्मनः किमपि अधिकं रूपम् इह समुपलक्षणया न मतम् ॥ (द्रुत०)॥

योजितार्थ—उपसंहृत पदों से युक्त श्रुत पदों के द्वारा जो अवशिष्ट (अश्रुत) निषेध्य का निषेधन है, वह भी यहाँ अभीष्ट है, क्योंकि निषेध श्रुति के श्रुत पद (अश्रुत के भी) उपलक्षक होते हैं। उपसंहृत पदों से समन्वित विधिवाक्यगत श्रुत पदों के द्वारा वो परमात्मा का कोई अधिक (अश्रुत) रूप उपलक्षित नहीं माना जाता ॥

भावितार्थ—निषेध वाक्य कल्पित अनात्मरूप के निषेधक होते हैं, कल्पित रूप अनन्त है, उनका कुछ परिगणित निषेध वाक्यों के द्वारा अभिधा वृत्ति से निषेध संभावित

नहीं, अतः इन पदों को उपलक्षण मानना पड़ता है, किन्तु विधिवाक्य केवल आत्मस्वरूप के समर्पक होते हैं, वह विधिवाक्य के श्रुत पदों से ही अवगत कराया जा सकता है, अतः विधिवाक्य-घटक पद किसी अश्रुत के उपलक्षक नहीं माने जाते ॥ ३२२-३२३ ॥

विधिवाक्यगत पद अश्रुत के लक्षक क्यों नहीं ? इसका उत्तर है—

न खलु संश्रुतसंहृतशब्दयोः
अविषयः परमात्मन इष्यते ।
किमपि रूपममुत्र हि नास्ति नः
किमपि मानमतो न तदस्ति नः ॥ ३२४ ॥

योजना—परमात्मः किमपि रूपं संश्रुतसंहृतशब्दयोः अविषयो न खलु इष्यते, अमुत्र हि किमपि नः मानं नास्ति, अतः नः तत् नास्ति ॥ (द्रुतविलम्बितम्) ॥

योजितार्थ—ब्रह्म का कोई भी रूप श्रुत तथा उपसंहृत शब्दों का अविषय माना जाता क्योंकि उसमें कोई हमारे मत से प्रमाण नहीं, अतः वह है ही नहीं ॥

भावितार्थ—ब्रह्म का कोई अंश यदि विधि-शब्दों का विषय न होता, तब अवश्य विधिवाक्यों को उसका उपलक्षक मानते, किन्तु उसके होने में कोई प्रमाण उपलब्ध नहीं होता, अतः विधिवाक्य को उपलक्षण मानने की आवश्यकता नहीं ॥ ३२४ ॥

उपसंहार में युक्ति दिखाते हैं—

गुणतया हि पदानि परात्मनो
विधिनिषेधवचस्स्ववतस्थिरे ।
गुणगणो गुणितन्त्रतया गुणी
भवति यत्र हि तत्र भवत्यसौ ॥ ३२५ ॥

योजना—विधिनिषेधवचःसु पदानि परात्मनः गुणतया अवतस्थिरे, गुणगणो हि गुणितन्त्रतया, यत्र गुणी भवति, तत्र हि असौ भवति ॥ (द्रुतविलम्बितम्) ॥

योजितार्थ—विधि-निषेध वाक्यों के पद ब्रह्म के गुण होकर अवस्थित हैं, गुण-गण अपने गुणी के अधीन होने के कारण जहाँ गुणी होता है, वहाँ ही यह होता है ॥

भावितार्थ—गुण और प्रधान का नित्य सम्बन्ध होता है, विशेषण गुण तथा विशेष्य प्रधान माना जाता है। समस्त वाक्यों के पद विशेषण हैं, उनका विशेष्य एक मात्र ब्रह्म है, अतः सभी पदों का अपने विशेष्य के चरणों में एकत्र हो जाना नितान्त स्वाभाविक है ॥ ३२५ ॥

पदोपसंहार-प्रकरण का उपसंहार करते हैं—

विधिनिषेधवचः परिमाणतः
तव मया कथितं नयवर्त्मना ।
यदपरं तव वस्तु बुभुत्सितं
तदिह नः पुरतः प्रकटीकुरु ॥ ३२६ ॥

योजना—मया नयवर्त्मना परिमाणतः विधिनिषेधवचः कथितम्, यद् अपरं वस्तु तव बुभुत्सितम्, तद् इह नः पुरतः प्रकटीकुरु ॥ (द्रुतविलम्बितम्) ॥

योजितार्थ—मैं (गुरु) नें युक्ति-युक्त परिमाण की दृष्टि से विधि-निषेध वाक्य कह दिये, जो और कोई वस्तु तुम्हें जिज्ञासित हो, वह भी यहाँ हमारे सामनें प्रकट करो ॥३२६॥

अन्तरङ्गबहिरङ्गसाधननिरूपणम्

गुरु की आज्ञा पाकर शिष्य पूछता है—

अन्तरङ्गबहिरङ्गसाधने
भेदतः कथय तद् बुभुत्सितम् ।
ज्ञानजन्मन इदं जिघृक्षितं
हेयमेतदिति चोपपत्तिभिः ॥ ३२७ ॥

योजना—अन्तरङ्गबहिरङ्गसाधनं ज्ञानजन्मने इदं जिघृक्षितम्, इदं हेयम्—इति उपपत्तिभिः भेदतः कथय, तत् बुभुत्सितम् ॥ (रथोद्धता) ॥

योजितार्थ-अन्तरङ्ग और बहिरङ्ग साधनों का ज्ञान की उत्पत्ति में यह उपादेय है, यह हेय है—इस प्रकार भेद-निदर्शनपूर्वक कथन कीजिए, यही जिज्ञासित है ॥३२७॥

उक्त साधनों का उपयोग-स्थल दिखाते हैं—

अन्तरङ्गमपवर्गकाङ्क्षिभिः
कार्यमेव यतिभिः प्रयत्नतः ।
त्याज्यमेव बहिरङ्गसाधनं
यत्नतः पतनभीरुभिर्भवेत् ॥ ३२८ ॥

योजना—अपवर्गकांक्षिभिः यतिभिः अन्तरङ्गं प्रयत्नतः कार्यमेव पतनभीरुभिः बहिरङ्गसाधनं यत्नतः त्याज्यमेव ॥ (रथोद्धता) ॥

योजितार्थ—मोक्ष के लिप्सु यतियों के लिए अन्तरङ्ग साधन बड़े यत्न से सम्पादनीय हैं, पतन भय से भीरु पुरुषों को बहिरङ्ग साधनों का यत्नतः त्याग कर देना चाहिए ॥ ३२८ ॥

गुरु उक्त जिज्ञासा को शान्त करता है—

उच्यते शृणु विविच्य साधनं
ज्ञानजन्मनि यदूचिवान्गुरुः ।
अन्तरङ्गबहिरङ्गभेदतः
शब्दशक्तिमनुसृत्य वैदिकीम् ॥ ३२९ ॥

योजना—वैदिकीं शब्दशक्तिम् अनुसृत्य अन्तरङ्गबहिरङ्गभेदतः विविच्य यत् साधनं गुरुः ऊचिवान्, तत् उच्यते, शृणु ॥ (रथोद्धता) ॥

योजितार्थ—वैदिक शब्दशक्ति का अनुसरण कर अन्तरङ्ग-बहिरङ्ग भेद से विवेचन करके जिन साधनों को हमारे गुरुवर नें कहा है, वे कहे जा रहे हैं, तुम सुनों !

भावितार्थ—ज्ञान के साधनों में सम्प्रदाय-सिद्धता व्यक्त करने के लिए कहा है—"यदूचिवान् गुरुः" । अर्थात् ये साधन वैदिक आचार्यों की उपदेश-परम्परा में आ रहे हैं, अतः प्रमाणिक हैं ॥ ३२९ ॥

बहिरङ्ग और अन्तरङ्ग की परिभाषा करते हैं—

यत् श्रुतं विविदिषोदयाय तत्
सर्वमेव बहिरङ्गसाधनम् ।
अन्तरङ्गमवगच्छ तत्पुनः
यत्परावगतिसाधनं श्रुतम् ॥ ३३० ॥

योजना—यत् विविदिषोदयाय श्रुतम्, तत् सर्वमेव बहिरङ्गसाधनम्, यत् पुनः परावगतिसाधनं श्रुतम् , तद् अन्तरङ्गम् आवगच्छ ॥

योजितार्थ—जो विविदिषा (जिज्ञासा) के लिए श्रुत है, वह समस्त बहिरङ्ग साधन है और जो ब्रह्म-ज्ञान का साधन कहा गया है, उसे अन्तरङ्ग समझो ॥

भावितार्थ—"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" (बृह० ४।४।२२) आदि श्रुतियों में जो यज्ञ-दान आदि कर्म विविदिषा (ज्ञान की इच्छा) के द्वारा श्रवणादि अङ्गों में प्रवर्तक देखे जाते हैं, वे सब बहिरङ्ग साधन माने जाते हैं। "तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्यति" (बृह० ४।४।२३) आदि श्रुतियों में श्रुत शम-दम एवं श्रवण-मनन आदि ज्ञान के साक्षात् साधन अङ्गों को अन्तरङ्ग साधन कहते हैं। आशय यह है कि ज्ञान के साक्षात् उत्पादक और पोषक अङ्गों को अन्तरङ्ग तथा उन अङ्गों के साधन तत्त्वों को बहिरङ्ग साधन कहा जाता है ॥ ३३० ॥

दूसरा लक्षण भी दिखाते हैं—

यद्धि कारकतयाऽवगम्यते
दूरतस्तदिह साधनं धियः ।
अन्तरङ्गमखिलं तु तत्पुनः
व्यञ्जकं भवति यत्परात्मनः ॥ ३३१ ॥

योजना—यद् हि कारकतया अवगम्यते, तद् इह धियः दूरतः साधनम्, यत् पुनः परात्मनः व्यंजकं भवति तत् अखिलम् अन्तरङ्गम् ॥ (रथोद्धता) ॥

योजितार्थ—जो (श्रुतियों में) कारक (जनक) रूप से श्रुत है और जो परमात्मा का व्यंजक होता है, वह सब अन्तरङ्ग साधन माना जाता है ॥

भावितार्थ—अदृष्ट के द्वारा फल के उत्पादक यज्ञादि को कारक कहते हैं। दृष्ट उपकार के द्वारा तत्त्वज्ञान के हेतु श्रवणादि को अभिव्यंजक कहते हैं। कारक बहिरङ्ग तथा व्यंजक अन्तरङ्ग माना जाता है ॥ ३३१ ॥

उक्त अङ्गों में संन्यासी के लिए हेय-उपादेय बताते हैं—

कारकस्य करणेन तत्क्षणाद्
भिक्षुरेष पतितो भवेद्यथा ।
व्यञ्जकस्य परिवर्जनात्तथा
सद्य एव पतितो भवेदसौ ॥ ३३२ ॥

योजना—यथा एष भिक्षुः कारकस्य करणेन तत्क्षणात् पतितो भवेत्, तथा असौ व्यञ्जकस्य परिवर्जनात् सद्य एव पतितो भवेत् ॥ (रथोद्धता) ॥

योजितार्थ—जैसे यह संन्यासी (यज्ञादि) कारक अङ्गों का अनुष्ठान करने से तुरन्त पतित हो जाता है, वैसे ही यह श्रवणादि व्यञ्जक अङ्गों का परित्याग करके शीघ्र ही पतित हो जाता है ॥ ३३२ ॥

"विविदिषन्ति यज्ञेन" (बृह० ४।४।२२) आदि श्रुतियों से यज्ञादि का विधान प्रकृत्यर्थ वेदन में नहीं, अपितु सन् प्रत्ययार्थ इच्छा में ही है—

प्रत्ययार्थविषयं हि कर्मणाम्
उच्यते विविदिषेयुरित्यतः ।
न प्रकृत्यभिहितार्थवेदने
वेदवाचि विनियोगशासनम् ॥ ३३३ ॥

योजना—वेदवाचि विविदिषेयुः—इत्यतः कर्मणां विनियोगशासनं प्रत्ययार्थविषयम् उच्यते, प्रकृत्यभिहितार्थवेदने न ॥ (रथोद्धता) ॥

योजितार्थ—वेद में "विविदिषेयुः" आदि वाक्यों से कर्मों का विनियोग 'सन्' प्रत्यय के अर्थ (इच्छा) में किया जाता है, प्रकृति (विद्) के अर्थ (वेदन) में नहीं ॥

भावितार्थ—"यज्ञेन विविदिषन्ति" आदि स्थलों पर यज्ञ आदि कर्मों का विधान वेदन (ज्ञान) में नहीं कि यज्ञ आदि कर्म बहिरङ्ग न होकर अन्तरङ्ग हो जाते । यहाँ वेदन प्रकृत्यर्थ है और इच्छा 'सन्' प्रत्ययार्थ, अतः वेदन से प्रधान होने के कारण इच्छा में ही यज्ञ आदि का विधान माना जाता है ॥ ३३३ ॥

यहाँ वेदन को प्रधान नहीं माना जा सकता—

न प्रधानमपहाय वेदनेन
अन्वयं व्रजति कर्मसाधनम् ।
संगतिर्भवति वेदनेच्छया
वेदनेन न तु कर्मणां क्वचित् ॥ ३३४ ॥

न प्रधानमिह वेदनं भवेत्
प्रत्ययार्थविषयां प्रधानताम् ।
उत्ससर्ज भगवान्निरङ्कुशं
येन पाणिनिरलंघ्यशासनः ॥ ३३५ ॥

योजना—कर्मसाधनं प्रधानम् अपहाय वेदनेन अन्वयं न व्रजति, कर्मणां वेदनेच्छया संगतिः भवति, वेदनेन क्वचित् न । येन अलंघ्यशासनः भगवान् पाणिनिः प्रत्ययार्थविषयां प्रधानतां निरंकुशम् उत्ससर्ज ॥ (रथोद्धतावृत्ते) ॥

योजितार्थ—कर्मरूप साधन अपने प्रधान (इच्छा) को छोड़कर वेदनरूप गुण पदार्थ के साथ अन्वित नहीं हो सकता, कर्मों की वेदनेच्छा के साथ संगति होती है, वेदन के साथ कहीं भी नहीं । अलंघ्यशासन भगवान् पाणिनि ने प्रत्ययार्थ की प्रधानता का निरंकुशरूप से विधान किया है ॥

भावितार्थ—वैयाकरण आचार्यों ने प्रकृत्यर्थ को गुण और प्रत्ययार्थ को सर्वत्र प्रधान माना है, अतः यहाँ वेदनरूप प्रकृत्यर्थ की अपेक्षा सन् प्रत्ययार्थ इच्छा को ही प्रधान मानना होगा ॥ ३३४, ३३५ ॥

जहाँ सन् प्रत्ययार्थ की प्रधानता का कोई बाधक होता है, वहाँ प्रकृत्यर्थ को भी प्रधान मान लिया जाता है, किन्तु यहाँ कोई बाधक नहीं—

प्रत्यये सनि न चापवादकं
किंचिदप्युदितवानसौ मुनिः ।
येन तत्र गुणभावमुद्वहेत्
प्रत्ययाभिहितमर्थवस्तु नः ॥ ३३६ ॥

योजना—असौ मुनिः सनि प्रत्यये न किञ्चिद् अपि अपवादकं च उदितवान्, येन तत्र प्रत्ययाभिहितम् अर्थवस्तु गुणभावम् उद्वहेत् ॥ (रथोद्धता) ॥

योजितार्थ—महामुनि पाणिनि ने सन् प्रत्यय में हमें कोई अपवादक नहीं दिखाया कि यहाँ प्रत्ययार्थ गुण हो जाता ॥

भावितार्थ—"प्रकृतिप्रत्ययौ सहार्थं ब्रूतः तयोस्तु प्रत्ययः प्राधान्येन" यह नियम औत्सर्गिक है, जब तक इसका बाध न हो, तब तक प्रकृत्यर्थ को प्रधान नहीं माना जा सकता, प्रकृत में कोई ऐसा अपवादक उपलब्ध नहीं होता कि सन् प्रत्ययार्थ को प्रधान न मानकर प्रकृत्यर्थ वेदन को प्रधान मान लिया जाता ॥ ३३६ ॥

यदि शंका की जाय कि भगवान् पाणिनि ने "धातोः कर्मणः"–इस सूत्र में धात्वर्थ को सन् प्रत्ययार्थ का कर्म कहा है, कर्म प्रधान होता है, अतः धात्वर्थरूप वेदन को ही यहाँ प्रधान मानना चाहिए, तो उसका समाधान करते हैं—

धातोः कर्मण इत्युवाच भगवान्यत्पाणिनिस्तत्पुनः
धात्वर्थस्य निवेदयत्यभिमतं प्राधान्यमायुष्मतः ।
किन्त्वार्थं न तु शब्दगम्यमवदत्तेनापि तद्योक्ष्यते
नोत्सर्गस्य विना निमित्तमपरं संकोचनं युज्यते ॥ ३३७ ॥

योजना—यत् पुनः भगवान् पाणिनिः "धातोः कर्मणः" इति उवाच, तत् आयुष्मतः अभिमतं धात्वर्थस्य प्राधान्यं निवेदयति, किन्तु आर्थम्, न तु शब्दगम्यम् अवदत्, तेन अपि तत् योक्ष्यते, निमित्तं बिना अपरम् उत्सर्गस्य संकोचनं न युज्यते ॥ (शार्दूलवि०) ॥

योजितार्थ—जो भगवान् पाणिनि ने "धातोः कर्मणः" यहाँ कहा है, वह आपका अभीष्ट धात्वर्थगत प्राधान्य अवश्य सूचित करता है, किन्तु आर्थिक (प्राधान्य) ही कहा है, शाब्द नहीं, उससे भी वह युक्त (संगत) हो जायगा, अपवादक के बिना और कोई औत्सर्गिक नियम का संकोचक नहीं हो सकता ॥

भावितार्थ—शाब्दबोध में सभी पदार्थों का अपने प्रधान पदार्थ के साथ अन्वय हुआ करता है, हाँ, यह प्रधानत्व शाब्द विवक्षित है, आर्थिक नहीं, जैसे "राजपुरुषम् आनय"—यहाँ अर्थतः राजा प्रधान है और पुरुष गौण (अमुख्य) हैं, फिर भी आनयन आदि का राजा के साथ अन्वय नहीं होता, क्योंकि वहाँ शब्दतः प्राधान्य पुरुष का ही है,

अतः उसके साथ ही और पदार्थों का अन्वय होता है। "धातोः कर्मणः समानकर्तृकादिच्छायां वा"-इस सूत्र में धात्वर्थ को जो प्रधान बताया गया है, वह प्राधान्य आर्थिक है, शाब्द नहीं, अतः यज्ञ आदि पदार्थों का वेदनरूप धात्वर्थ के साथ अन्वय नहीं हो सकता, सन् प्रत्ययार्थ इच्छा ही शब्दतः प्रधान है, उसी के साथ यज्ञ आदि का अन्वय न्यायसंगत है ॥ ३३७ ॥

कथित अर्थ का ही स्पष्टीकरण करते हैं—

धातोः कर्मण इत्युदीरणमिदं साधारणं दृश्यते
शाब्दार्थत्वविशेषसूचकतया न ह्यत्र सूत्रे पदम् ।
धात्वर्थस्य तु कर्मतावचनमत्रोच्चारितं केवलं
तच्चार्थेऽप्युपपद्यमानमधुना नोत्सर्गपीडाकरम् ॥ ३३८ ॥

योजना—"धातोः कर्मणः"—इति साधारणम् उदीरणं दृश्यते, अत्र हि सूत्रे शब्दार्थत्वविशेषसूचकतया पदं न, अत्र केवलं धात्वर्थस्य कर्मतावचनम् उच्चारितम्, तत्तु आर्थेऽपि अधुना उपपद्यमानम्, उत्सर्गस्य पीडाकरं न ॥ (शार्दूल०) ॥

योजितार्थ—"धातोः कर्मणः" यह साधारण कथनमात्र देखा जाता है, इस सूत्र में शब्दार्थत्वविशेष का सूचक कोई पद नहीं अर्थात् इसमें केवल धात्वर्थ को कर्म कहा गया है, वह अर्थ-दृष्टि से भी बन जाता है, औत्सर्गिक धर्म का बाधक नहीं होता ॥ ३३८ ॥

शब्दतः इच्छा का ही प्राधान्य प्रकट होता है—

इच्छायामिति सूत्रकारवचनं प्राधान्यपक्षे भवेद्
इच्छार्थस्य समञ्जसं न खलु तत्सन्प्रत्ययार्थे गुणे ।
धात्वर्थे ननु सन् भवेदिति वदेदिच्छा गुणश्चेद्भवेद्
इच्छायामिति वक्ति तेन वदति प्राधान्यमिच्छागतम् ॥३३९॥

योजना—"इच्छायां सन्"-इति सूत्रकारवचनम् इच्छार्थस्य प्राधान्यपक्षे समञ्जसं भवेत्, सन् प्रत्ययार्थे गुणे खलु न। चेत् इच्छा गुणः भवेत्, "धात्वर्थे सन् भवेत्"—इति वदेत् ननु, इच्छायामिति वक्ति; तेन इच्छागतं प्राधान्यं वदति ॥ (शार्दूल०) ॥

योजितार्थ—"इच्छायां सन्" (पा० सू०)—यह सूत्रकार का वचन इच्छारूप अर्थ के प्राधान्य पक्ष में समञ्जस होता है, सन् प्रत्ययार्थ के गुण (अप्रधान) होनें पर नहीं। यदि इच्छा धात्वर्थ का गुण होती, तब "धात्वर्थे सन् भवेत्"—ऐसा सूत्रकार कहता, किन्तु "इच्छायाम्"—ऐसा कहता है; अतः इच्छा की प्रधानता बताता है ॥

भावितार्थ—प्रकृति और प्रत्यय मिलकर गुणभूत अर्थ से युक्त प्रधान अर्थ को कहते हैं, गुणभूत अर्थ को पृथक् नहीं, "इच्छायां सन्"—इस कथन से इच्छा में वाच्यत्व के कथन से शब्दतः उसी का प्राधान्य झलकता है। यदि इच्छा में गुणत्व और धात्वर्थ में प्रधानत्व सूत्रकार को अभिमत होता, तब सूत्रकार "धात्वर्थे सन्"—ऐसा सूत्र बनाता, किन्तु वह "इच्छायां सन्" कहता है, अतः इच्छा का प्राधान्य निर्विवाद सिद्ध है ॥३३९॥

अतः यज्ञादि बहिरंग ही सिद्ध होते हैं—

तस्मात्कर्म समस्तमेव तु भवेदिच्छाजनेः साधनं
शास्त्रेणोक्तमतः समस्तमपि तद्यत्नेन हेयं यतेः ।
द्रष्टव्यत्वमनूद्य साधनतया यत्तत्प्रतीचः श्रुतं
वेदान्तश्रवणादिकं भवति तत्कर्त्तव्यमावश्यकम् ॥ ३४० ॥

योजना—तस्मात् समस्तमेव कर्म इच्छाजनेः साधनं शास्त्रेण उक्तं भवेत्, अतः तत् समस्तमपि यतेः यत्नेन हेयम् । प्रतीचः द्रष्टव्यत्वम् अनूद्य यत् यत् साधनतया श्रुतं वेदान्तश्रवणादिकम्, तत् आवश्यकं कर्त्तव्यं भवति ॥ (शार्दूलवि०) ॥

योजितार्थ—समस्त कर्म इच्छा की उत्पत्ति का साधन शास्त्र में कहा गया है, अतः वह समस्त कर्म यति के लिए यत्नतः त्याज्य है। प्रत्यगात्मा की द्रष्टव्यता का अनुवाद करके जो-जो साधन श्रुत है—वेदान्त-श्रवणादि, वह अवश्य कर्त्तव्य होता है ॥

भावितार्थ—समस्त कर्मों का त्याग करके यति श्रवणादि अन्तरंग अंगों का अनुष्ठान करे, क्योंकि आत्मा "वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यः" (बृह० २।४।५) आदि श्रुतियों में आत्मा की द्रष्टव्यता का अनुवाद करके दर्शन के साधनों के रूप में श्रवण आदि का विधान किया गया है, अतः शम-दम आदि निवृत्ति-धर्म का पालन करता हुआ संन्यासी ज्ञान के विरोधी यज्ञ आदि व्यापारों का परित्याग करे—यही समुचित और शास्त्र-सम्मत मार्ग है ॥ ३४० ॥

सभी साधनों का उपयोग बताते हैं—

वेदान्तवाक्यमिह कारणमात्मबोधे
हेत्वन्तराणि परिपन्थिनिवर्हणानि ।
यज्ञादिकानि दुरितं क्षपयन्ति बुद्धेः
तत्त्वंपदार्थविषयं तम उत्तराणि ॥ ३४१ ॥

योजना—इह वेदान्तवाक्यम् आत्मबोधे कारणम्, हेत्वन्तराणि परिपन्थिनिवर्हणानि यज्ञादिकानि बुद्धेः दुरितं क्षपयन्ति उत्तराणि तत्त्वंपदार्थविषयं तमः ॥ (वसन्ततिलका) ॥

योजितार्थ—इस (वेदान्त-सिद्धान्त) में वेदान्त-वाक्य आत्मज्ञान के उत्पादक माने जाते हैं और अन्य साधन प्रतिबन्धक के निवारक होते हैं—यज्ञादि (बहिरंग) अन्तःकरणगत पाप का नाश करते हैं तथा उत्तर (श्रवण आदि) अंग तत्त्वंपदार्थविषयक अज्ञान का ॥ ३४१ ॥

तत्त्वंपदार्थविषयक अज्ञान पर प्रकाश डालते हैं—

तत्त्वंपदार्थविषयं तम इत्यपीदम्
अर्वागवस्थजनदृष्टिमपेक्ष्य गीतम् ।
अज्ञानमुत्तमदृशां पुनरेकमेव
संसारमूलमपवर्गफला च विद्या ॥ ३४२ ॥

योजना—तत्त्वंपदार्थविषयं तमः—इतीदमपि अर्वागवस्थजनदृष्टिम् अपेक्ष्य गीतम्, उत्तमदृशां पुनः संसारमूलम् अज्ञानम् एकमेव, विद्या च अपवर्गफला ॥ (वसन्ततिलका) ॥

योजितार्थ—तत्त्वंपदार्थविषयक अज्ञान—यह स्थूल दृष्टि की अपेक्षा कहा है, सूक्ष्मदर्शी व्यक्तियों के लिए संसार का मूलभूत अज्ञान एक ही है और विद्या अपवर्गफलक होती है ॥

भावितार्थ—गत (३४१ वें) पद्य में जिन दो अज्ञानों का उल्लेख आता है, अर्थात् महावाक्य के द्वारा निरसनीय एक अज्ञान और श्रवणादि अन्तरंग साधनों से निराकरणीय दूसरा अज्ञान। वे दोनों वस्तुतः भिन्न नहीं, क्योंकि वेदान्त-सिद्धान्त में एक ही अज्ञान माना जाता है और उसका निवर्तक ज्ञान भी एक ही माना जाता है ॥ ३४२ ॥

यदि अज्ञान एक ही है, तब उसकी निवृत्ति महावाक्य से ही हो जायगी, श्रवण आदि का उपयोग क्या ? इस प्रश्न का उत्तर है—

अज्ञानसंशयविपर्ययरूपकाणि
ब्रह्मात्मबुद्धिजननप्रतिबन्धकानि ।
तत्त्वंपदार्थविषयाणि निवर्तयन्ति
ह्यावृत्तिमन्ति मननश्रवणादिकानि ॥ ३४३ ॥

योजना—आवृत्तिमन्ति मननश्रवणादिकानि तत्त्वंपदार्थविषयाणि अज्ञानसंशयविपर्ययरूपाणि ब्रह्मात्मबुद्धिजनकप्रतिबन्धकानि निवर्तयन्ति ॥ (वसन्ततिलका) ॥

योजितार्थ—बार-बार अनुष्ठित श्रवण-मनन आदि (अन्तरंग साधन) तत्त्वंपदार्थ-विषयक अज्ञान-संशय-विपर्ययरूप आत्मज्ञान-जनक के प्रतिबन्धकों को निवृत्त करते हैं ॥

भावितार्थ—वेदान्त-तात्पर्य विषयक अज्ञान तथा संशय आदि रूप प्रतिबन्धकों को श्रवण, प्रमेयादिगत असम्भावना को मनन और चित्त-चाञ्चल्यरूप प्रतिबन्धक को निदिध्यासन निवृत्त करता है ॥ ३४३ ॥

श्रवण और मनन का स्वरूप दिखाते हैं—

शब्दशक्तिविषयं निरूपणं
युक्तितः श्रवणमुच्यते बुधैः ।
वस्तुवृत्तविषयं निरूपणं
युक्तितो मननमित्युदीर्यते ॥ ३४४ ॥

योजना—युक्तितः शब्दशक्तिविषयं निरूपणं बुधैः श्रवणम् उच्यते, युक्तितः वस्तुवृत्तविषयं निरूपणं मननम्—इति उदीर्यते ॥ (रथोद्धता) ।

योजितार्थ–युक्तियों से शब्द-शक्ति विषयक निरूपण को विद्वान् श्रवण और युक्तियों के द्वारा (तत्त्वंपद-लक्ष्य) वस्तु के एकतारूप वृत्त के निरूपण को मनन कहा करते हैं ॥

भावितार्थ–युक्तियों के द्वारा ब्रह्म में श्रुतियों के तात्पर्य का अवधारण श्रवण कहलाता है एवं ब्रह्मात्माभेदरूप वस्तु का युक्तियों से स्थिरीकरण मनन कहलाता है ॥ ३४४ ॥

निदिध्यासन का स्वरूप दिखाते हैं—

चेतसस्तु चितिमात्रशेषता
ध्यानमित्यभिवदन्ति वैदिकाः ।
अन्तरङ्गमिदमित्थमीरितं
तत्कुरुष्व परमात्मबुद्धये ॥ ३४५ ॥

योजना—चेतसः चितिमात्रशेषता तु वैदिकाः ध्यानम्—इति अभिवदन्ति । इत्थम् इदम् अन्तरंगम्, उदीरितम् तत् परमात्मबुद्धये कुरुष्व ।। (रथोद्धता) ।।

योजितार्थ—चित्त की चैतन्यैकरसता के रूप में स्थिति को वैदिकगण ध्यान कहा करते हैं। इस प्रकार यह अन्तरंग साधन-वर्ग कहा गया, हे शिष्य ! उसका परमात्म-बोध के लिए अनुष्ठान कर ।। ३४५ ।।

निदिध्यासन का ही रूपान्तर दिखाते हैं—

श्रवणमननबुद्ध्योर्जातयोर्यत्फलं तत्
निपुणमतिभिरुच्चैरुच्यते दर्शनाय ।
अनुभवनविहीना यैवमेवेति बुद्धिः
श्रुतिमननसमाप्तौ तन्निदिध्यासनं हि ।। ३४६ ।।

योजना-श्रवणमननबुद्ध्योः जातयोः यत् फलम्, तत् निपुणमतिभिः दर्शनाय उच्चैः उच्यते, श्रुतमननसमाप्तौ या इयम् एव अनुभवनविहीना बुद्धिः, तत् हि निदिध्यासनम् ।। (मालिनी) ।।

योजितार्थ—श्रवण-मनन बुद्धियों के उत्पन्न होने पर जो फल होता है, उसे निपुण आचार्य आत्मदर्शन का निमित्त उद्घोषित करते हैं अर्थात् श्रवण और मनन के समाप्त होने पर जो यह आत्मसाक्षात्कार से भिन्न बुद्धि उत्पन्न होती है, वही निदिध्यासन है ।।

भावितार्थ–"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यः" (बृह० २।४।५) इस श्रुति में श्रवण से मनन, मनन से निदिध्यासन और निदिध्यासन से आत्मदर्शन बताया गया है, अतः निदिध्यासन उस बुद्धि का नाम स्थिर होता है, जो श्रवण और मनन से उत्पन्न होकर आत्मदर्शन को जन्म दे ।। ३४६ ।।

फलित अर्थ दिखाते हैं—

पूर्वाण्यदृष्टपरिपन्थिनिबर्हणानि
दृष्टं हरन्ति च विरोधिनमुत्तराणि ।
वाक्यं निरस्तसकलप्रतिबन्धकं सद्
आत्मानमद्वयमखण्डमबुद्धमाह ।। ३४७ ।।

योजना-पूर्वाणि अदृष्टपरिपन्थिनिबर्हणानि, उत्तराणि च दृष्टं विरोधिनं हरन्ति वाक्यं निरस्तसकलप्रतिबन्धकं सत् अद्वयम् अखण्डम् अबुद्धम् आत्मानम् आह ।। (वसन्त०) ।।

योजितार्थ—पूर्व (बहिरंग) साधन अदृष्टरूप प्रतिबन्धक के निवारक होवे हैं, उत्तर (अन्तरंग) साधन दृष्ट प्रतिबन्धक का अपहरण करते हैं और महावाक्य समस्त प्रतिबन्धकों से रहित होकर अद्वय, अखण्ड, अज्ञात आत्मा को कहता है ।। ३४७ ।।

ज्ञान इसी जन्म में होता है ? या जन्मान्तर में ? इस सन्देह का समाधान है—

यज्ञादिक्षपितसमस्तकल्मषाणां
पुत्रादित्रयगतसंगवर्जितानाम् ।
संशुद्धे पदयुगलार्थतत्त्वमार्गे
प्रायेणोद्भवति हि जन्मनीह विद्या ।। ३४८ ।।

योजना—यज्ञादिक्षपितसमस्तकल्मषाणां पुत्रादित्रयगतसंगविवर्जितानां पदयुगलार्थतत्त्वमार्गे संशुद्धे प्रायेण इह हि जन्मनि विद्या उद्भवति ॥ (प्रहर्षिणी) ॥

योजितार्थ—यज्ञादि के द्वारा जिनके पाप निवृत्त हो गये हैं, पुत्रैषणादि एषणात्रय से जो रहित हैं, ऐसे पुरुषों को तत्त्वम्पदार्थों का शोधन कर लेने पर प्रायः इसी जन्म में ब्रह्मज्ञान उत्पन्न हो जाता है ॥ ३४८ ॥

प्रायः कथन को स्पष्ट करते हैं—

अत्रैव जन्मनि भवेदपवर्गदायि
वाक्यप्रसूतमनुभूतिफलावसानम् ।
ज्ञानं निवारकनिमित्तवशादमुष्मिन्
जन्मन्यपीति वचनादवगम्यते हि ॥ ३४९ ॥

योजना—अत्रैव जन्मनि वाक्यप्रसूतम् अनुभूतिफलावसानम् अपवर्गदायि ज्ञानं भवेत्, निवारकनिमित्तवशात् अमुष्मिन् जन्मनि अपि—इति वचनात् अवगम्यते हि ॥ (वसन्ततिलका) ॥

योजितार्थ—इसी जन्म में महावाक्य-प्रसूत, अनुभूतिफलक, अपवर्गदायक ज्ञान होता है, प्रतिबन्धकरूप निमित्त के वश दूसरे जन्म में भी होता है—ऐसा (वक्ष्यमाण) वचन से जाना जाता है ॥ ३४९ ॥

वह वचन ही दिखाते हैं—

ज्ञानोत्पत्तिं वामदेवस्य गर्भे
श्रुत्वा विद्मः साधनं प्राच्यमस्य ।
योगभ्रष्टस्मृत्यवष्टम्भतोऽपि
विज्ञातव्यं साधनं प्राच्यमस्य ॥ ३५० ॥

योजना—गर्भे वामदेवस्य ज्ञानोत्पत्तिं श्रुत्वा अस्य प्राच्यं साधनं विद्मः, योगभ्रष्टस्मृत्यवष्टम्भतोऽपि अस्य प्राच्यं साधनं विज्ञातव्यम् ॥ (शालिनी) ॥

योजितार्थ—गर्भ में ही वामदेव को ज्ञानोत्पत्ति की श्रुति में चर्चा सुनकर इस (वामदेव) के पूर्व जन्म में सम्पादित साधनों की कल्पना हम कर लेते हैं, योग-भ्रष्ट विषयक (गी० ६।४१) स्मृति के आधार पर भी इस (वामदेव) के पूर्वजन्म के साधनों को जान लेना चाहिए ॥

भावितार्थ—श्रुति कहती है–"गर्भे एवैतच्छयानो वामदेव एवमुवाच" (ऐत० ५।४) अर्थात् गर्भ में ही लेटे-लेटे वामदेव ने यह कहा कि मैं ही सब कुछ हूँ। गर्भ में तो ज्ञान के साधनों का अनुष्ठान हो नहीं सकता, अतः गर्भ में वामदेव को उसके पूर्वजन्म के साधनों के बल पर ही ज्ञान हुआ—यह मानना पड़ेगा। इससे यह सिद्ध हो जाता है कि किसी प्रबल प्रतिबन्धक के आ जाने पर उसी जन्म में ज्ञान न होकर जन्मान्तर में भी होता है। भगवद्गीता (६।४१) का "योगभ्रष्टोऽभिजायते"—यह वाक्य भी उसी सिद्धान्त को पुष्ट करता है ॥ ३५० ॥

जैसे दृष्टफलक "कारीरी" आदि कर्मों का फल इस जन्म में ही होता है, वैसे ही श्रवण आदि भी दृष्टफलक हैं, तब इनका भी जन्मान्तर में फल कैसे हो सकेगा ? इस सन्देह का समाधान है—

चित्रादिवद्भवति साधनजातमस्य
ज्ञानप्रसूतिकरमित्यवगच्छ सर्वम् ।
अभ्यग्रशुष्यदखिलौषधिकस्य पुंसो
वृष्टिप्रदेष्टिरधिकारवशादिहैव ॥ ३५१ ॥

योजना-अस्य ज्ञानप्रसूतिकरं सर्वं साधनजातं चित्रदिवत् भवति—इति अवगच्छ, *अभ्यग्रशुष्यदखिलौषधिकस्य पुंसः इष्टिः अधिकारवशात् इहैव वृष्टिप्रदा ॥ (वसन्त०) ॥

योजितार्थ—इस (ज्ञान के अधिकारी पुरुष) का समस्त साधन-समूह "चित्रा" इष्टि के समान (अनियतफलक) होता है—ऐसा समझो, इसी समय जिसकी खेती सूख रही है, उस पुरुष की कारीरी इष्टि तो अधिकार-वश इसी समय वृष्टिरूप फल को देती है।

भावितार्थ—'कारीरी' इष्टि भी दृष्टफलक है और श्रवण आदि भी, किन्तु दोनों में यह महान् अन्तर है कि कारीरी तो इसी जन्म में वृष्टि फल को कामना से की जाती है, परन्तु श्रवण आदि इसी जन्म में ज्ञान की कामना से विहित नहीं, अपितु केवल ज्ञान के उद्देश्य से वैसे ही उनका विधान है, जैसे पशुरूप फल के उद्देश्य से "चित्रा" इष्टि का, अतः "कारीरी" इष्टि का फल इसी जन्म में होना उचित है, परन्तु श्रवण आदि के लिए ऐसा नियम नहीं हो सकता। जैसे "चित्रा" इष्टि का फल इस जन्म में भी होता है, किसी प्रतिबन्धक के आ जाने पर जन्मान्तर में, वैसे ही "श्रवण" आदि का भी फल होता है ॥ ३५१ ॥

अन्तरंग, बहिरंग साधनों की एक और विशेषता दिखाते हैं—

बहिरंगसाधनमशेषगुरोः
परमेश्वरस्य चरणाम्बुजयोः ।
नियमात्समर्पितमशेषमघं
विनिहन्ति बुद्धिनिलयं सुमहत् ॥ ३५२ ॥
न तथान्तरंगमुपलब्धिजनेः
उपकारकं शमदमप्रभृति ।
तदनुष्ठितं परमहंसजनैः
परमात्मतत्त्वमुपलम्भयति ॥ ३५३ ॥

योजना—अशेषगुरोः परमेश्वरस्य चरणाम्बुजयोः नियमात् समर्पितं बहिरंगसाधनं बुद्धिनिलयम् सुमहत् अशेषम् अघं विनिहन्ति। तथा उपलब्धिजनेः उपकारकं शमदमप्रभृति अन्तरंगं न, तत् परमहंसैः अनुष्ठितं परमात्मतत्त्वम् उपलम्भयति ॥ (प्रमिताक्षरावृत्ते) ॥

योजितार्थ-अशेषगुरु परमेश्वर के चरणकमलों में नियमतः समर्पित (यज्ञादि) बहिरंग साधन बुद्धिगत महान् पाप को विनष्ट कर देता है। वैसा ज्ञान-जन्म के उपकारक

---

* अभ्यग्रं साम्प्रतं शुष्यन्त्यखिलौषधयो यस्य तथोक्तस्य पुंस इत्यर्थः।

शम-दम आदि अन्तरंग नहीं, वे तो विरक्तजनों से अनुष्ठित होकर ही परमात्मतत्त्व के बोधक होते हैं ।।

भावितार्थ—विविदिषा के साधनभूत यज्ञ आदि के लिए ईश्वरार्पण आवश्यक है, ज्ञान के साधन श्रवण आदि के लिए नहीं—यह दोनों अंगों में महान् अन्तर है ।।३५२-३५३।।

उक्त अन्तर-दर्शन में प्रमाण दिखाते हैं—

भगवाननादिनिधनः कृपया
हरिरेतदाह जगदेकहितः ।
सकलं समर्प्य मयि युक्तमनाः
कुरु कर्म शुद्धिकरमित्यसकृत् ।। ३५४ ।।

न तथान्तरंगफलसंन्यसनं
क्वचिदूचिवानत इदं विदितम् ।
अनपेक्ष्य तत्फलपरित्यजनं
परमात्मनिश्चयफलं तदिति ।। ३५५ ।।

योजना—अनादिनिधनः जगदेकहितः भगवान् हरिरेव कृपया असकृत् आह—"शुद्धिकरं तत् सकलं कर्म मयि युक्तमनाः समर्प्य कुरु"। तथा अन्तरङ्ग-फल-संन्यसनं क्वचित् न ऊचिवान्, अत. इति विदितम्—तत्फलपरित्यजनम् अनपेक्ष्य तत् परमात्मनिश्चयफलमिति ।। (प्रमिताक्षरावृत्ते) ।।

योजितार्थ—आदि-अन्त से रहित, जगत् के एकमात्र हितैषी भगवान् हरि ने ही कृपा करके बार-बार कहा है कि अन्तःकरण-शुद्धि के साधन उन निखिल कर्मों का मेरे चरणों में युक्तमनस्क होकर समर्पण करते हुए अनुष्ठान करो । वैसा अन्तरङ्ग साधनों के फल का परित्याग कहीं नहीं कहा है, अतः यह जाना जाता है कि वह (अन्तरङ्ग साधन) अपने फल के परित्याग की अपेक्षा न करके ही ब्रह्म-ज्ञान रूप फल को जन्म देता है ।।

भावितार्थ—भगवान् ने गीता में "मयि सर्वाणि कर्माणि संन्यस्य" (गी० ३।३०) आदि वाक्यों से बहिरङ्ग साधनों का समर्पण जैसा कहा है, वैसा श्रवण आदि के लिए कहीं नहीं कहा, अतः उक्त अन्तर सुस्थिर किया गया है ।। ३५४-३५५ ।।

युक्ति से भी वही सिद्ध होता है—

अपि च बन्धनहेतुतया श्रुतं
समसमीक्षणकौशलशालिनः ।
भवति शुद्धिकरं न च बन्धकृद्
भवति कर्म तथा घटते हि तत् ।। ३५६ ।।

यदिह साधनमात्मधियः श्रुतं
न च फलान्तरहेतुतया श्रुतम् ।
शमदमादिकमत्र तु कौशलं
किमपि काङ्क्षितमस्ति न सिद्धये ।। ३५७ ।।

योजना—अपि च बन्धनहेतुतया श्रुतं कर्म [1]समसमीक्षणकौशलशालिनः शुद्धिकरं भवति, बन्धकृत् न च भवति, तत् तथा घटते। यत् इह आत्मधियः साधनं श्रुतम्, फलान्तरहेतुतया न श्रुतं शमदमादिकम्, अत्र तु सिद्धये किमपि कौशलं न कांक्षितम् अस्ति ॥ (द्रुतविलम्बिते) ॥

योजितार्थ—दूसरी बात यह है कि बन्धन-हेतुत्व रूप से श्रुत यज्ञादि कर्म ब्रह्म-दर्श में कुशल व्यक्ति के अन्तःकरण का शुद्धिकर होता है, बन्धकर नहीं होता, वह वैसा घट जाता है। किन्तु जो यहाँ आत्मज्ञान का साधन सुना गया है, फलान्तर का हेतु नहीं सुना गया शम दम आदि, इसमें फलोत्पत्ति के लिए किसी भी कौशल की अपेक्षा नहीं है ॥

भावितार्थ—यज्ञादि कर्म स्वभावतः बन्धन के हेतु हैं, भगवान् के चरणों में समर्पित होकर ही शुद्धि के जनक होते हैं, किन्तु श्रवणादि स्वभावतः ही ज्ञान के सम्पादक हैं, उन्हें ईश्वरार्पण की अपेक्षा क्यों होगी ? ॥ ३५६-३५७ ॥

साधन-निरूपण का उपसंहार करते हैं—

उक्तं साधनजातमत्र सकलं विद्यासमुत्पत्तये
यस्मिन् कर्मणि वैदिकेन विधिना नुन्नः परिव्राजकः ।
कर्तृत्वाद्युपमर्दनेन भवता विद्यानुकूलात्मना
कर्त्तव्यं तदशेषतस्तदनु ते विद्या विपाकं व्रजेत् ॥ ३५८ ॥

योजना—अत्र विद्यासमुत्पत्तये सकलं साधनजातम् उक्तम्, यस्मिन् कर्मणि वैदिकेन विधिना परिव्राजकः नुन्नः, तत् कर्तृत्वाद्युपमर्दनेन विद्यानुकूलात्मना भवता अशेषतः कर्त्तव्यम्, तदनु ते विद्या विपाकं व्रजेत् ॥ (शार्दूलविक्रीडितम्) ॥

योजितार्थ—इस (तृतीय अध्याय) में ज्ञान की उत्पत्ति के लिए सकल साधन-समूह कह दिया गया है, जिस (अन्तरंग साधनरूप) कर्म में वैदिक विधि के द्वारा परिव्राजक प्रवृत्त किया गया है, वह कर्तृत्वादि का उपमर्दन और ज्ञान के अनुकूल अधिकार का लाभ करते हुए आपका सर्वथा कर्त्तव्य है, तदनन्तर तुम्हें विद्या का फल मिलेगा ॥ ३५८ ॥

श्रवणादि में केवल परिव्राजक का ही अधिकार नहीं, अपितु औरों का भी है—

वानप्रस्थगृहस्थनैष्ठिकजनैरन्यैश्च वर्णाश्रमैः
कर्मव्यध्वनिषेवितं भवति वै जन्मान्तरे पाचकम् ।
विद्यायाः श्रवणादिलक्षणमिदं न ह्येतदेषां क्वचित्
शास्त्रेण प्रतिषिद्धमीक्षितमिदं शूद्रस्य दृष्टं यथा ॥ ३५९ ॥

योजना—वानप्रस्थगृहस्थनैष्ठिकजनैः अन्यैः, वर्णाश्रमैः च [2]कर्मव्यध्वनिषेवितम् इदं श्रवणादिलक्षणम् जन्मान्तरे विद्यायाः पाचकं भवति वै, एषां हि एतत् क्वचित् शास्त्रेण प्रतिषिद्धं न ईक्षितम्, यथा इदं शूद्रस्य दृष्टम् ॥ (शार्दूल०) ॥

योजितार्थ—वानप्रस्थ, गृहस्थ, नैष्ठिकजनों एवं अन्य वर्णाश्रमस्थ पुरुषों के द्वारा

---

[1] समस्य ब्रह्मणः समीक्षणं ज्ञानम्, तस्मिन् यत् कौशलम् ईश्वरार्पणम्, तच्छालिनः पुंस इत्यर्थः ।

[2] कर्मव्यध्वेषु कर्मच्छिद्रेषु आवश्यककर्मरहितावकाशेपु निषेवितमित्यर्थः ।

कर्म के अवकाश काल में अनुष्ठित वे श्रवणादि साधन जन्मान्तर में ज्ञान के पाचक होते हैं, क्योंकि इनके लिए यह (श्रवणादि) कहीं भी शास्त्र के द्वारा प्रतिषिद्ध नहीं देखे जाते, जैसे कि यह प्रतिषेध शूद्र के लिए देखा गया है ॥

भावितार्थ—श्रवणादि अन्तरंग साधनों के अनुष्ठान में केवल परिव्राजक का ही अधिकार नहीं, अपितु त्रैवर्णिकमात्र का अधिकार है, केवल शूद्र को अधिकार नहीं; क्योंकि उसके लिए पूर्ण वेद-श्रवण का ही निषेध किया गया है। यद्यपि गृहस्थादि अपने-अपने आश्रम धर्मों के करने में व्यस्त रहते हैं, तथापि जब कभी अवकाश मिले; तब श्रवणादि का अनुष्ठान किया जा सकता है, इससे जन्मान्तर में विद्या सुलभ हो जाती है ॥३५९॥

संन्यासी प्रायः इसी जन्म में मुक्त हो जाता है—

सर्वश्रुतिस्मृतिवचोभिरयं परिव्राड्
मुण्डः शुचिः परमहंस इति प्रसिद्धः ।
ज्ञानाय साधनधनेषु नियुज्यमानः
प्रायेण बुद्धिपरिपाकमवाप्स्यतीह ॥ ३६० ॥

योजना—सर्वश्रुतिस्मृतिवचोभिः ज्ञानाय साधनधनेषु नियुज्यमानः अयं परिव्राट्, मुण्डः, शुचिः, परमहंसः इति प्रसिद्धः प्रायेण इह बुद्धिपरिपाकम् अवाप्स्यति ॥ (वसन्ततिलका) ॥

योजितार्थ—समस्त श्रुति-स्मृति-वचनों के द्वारा ज्ञान के लिए साधनानुष्ठान में नियुज्यमान यह परिव्राट्, मुण्ड, शुचि, परमहंस आदि नामों से प्रसिद्ध संन्यासी प्रायः इसी जन्म में ज्ञान का फल (मुक्ति) प्राप्त कर लेता है ॥ ३६० ॥

पूर्वजन्म में संन्यासी रह कर यदि श्रवणादि का अनुष्ठान कर चुका है, किसी प्रबल प्रतिबन्धक के कारण तत्त्वज्ञान का लाभ नहीं कर सका था, तब वह दूसरा जन्म लेकर किसी भी आश्रम में ज्ञान प्राप्त कर लेता है—

जन्मान्तरेषु यदि साधनजातमासीत्
संन्यासपूर्वकमिदं श्रवणादिरूपम् ।
विद्यामवाप्स्यति जनः सकलोऽपि यत्र
तत्राऽऽश्रमादिषु वसन्न निवारयामः ॥ ३६१ ॥

योजना—यदि जन्मान्तरेषु संन्यासपूर्वकम् इदं श्रवणादिरूपं साधनजातम् आसीत्, (तदा) सकलोऽपि जनः यत्र तत्र आश्रमादिषु वसन् विद्याम् अवाप्स्यति, न निवारयामः ॥ (वसन्ततिलका) ॥

योजितार्थ—यदि जन्मान्तर में संन्यास लेकर यह श्रवण आदि साधनवर्ग सम्पादित कर लिया गया था, तब तो ऐसे सभी मनुष्य जिस-किसी भी आश्रम में रहकर ज्ञान की अवाप्ति कर लेंगे, उसे हम नहीं हटाते ॥ ३६१ ॥

ज्ञान के साधनानुष्ठान में संन्यास का नियम दिखाने के लिए मुण्डक (३।२।६) श्रुति का प्रमाण देते हैं—

वेदान्तविज्ञानसुनिश्चितार्थाः
संन्यासयोगाद्यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोकेषु परान्तकाले
परामृताः परिमुच्यन्ति सर्वे ॥ ३६२ ॥

योजना—(ये) शुद्धसत्त्वाः संन्यासयोगात् वेदान्तविज्ञानसुनिश्चितार्थाः यतयः, ते सर्वे परान्तकाले ब्रह्मलोकेषु परामृताः परिमुच्यन्ति ॥ (उपजाति) ॥

योजितार्थ—शुद्ध हृदय के जिन पुरुषों ने संन्यास लेकर वेदान्त-विचार के द्वारा परमार्थ तत्त्व का निश्चय कर लिया है, वे सभी यतिगण महाप्रलय के समय ब्रह्मलोक में ही परम अमृत (कैवल्य) का लाभ करके विदेह मुक्त हो जाते हैं ॥ ३६२ ॥

इसी अर्थ में इतिहास-प्रमाण देते हैं—

नैतादृशं ब्राह्मणस्यास्ति वित्तं
यथैकता समता सत्यता च ।
शीलं स्थितिर्दण्डनिधानमार्जवं
ततः ततश्चोपरमः क्रियाभ्यः ॥ ३६३ ॥

योजना—एतादृशं ब्रह्मणस्य वित्तं नास्ति, यथा एकता, समता, सत्यता, शीलम्, स्थितिः, दण्डनिधानम्, आर्जवम्, ततस्ततः क्रियाभ्यः उपरमश्च ॥ (उपजाति) ॥

योजितार्थ—ऐसा ब्राह्मण का और धन नहीं, जैसा कि एकता (निःसहायता), समता, सत्यता, सदाचरण, मर्यादापालन, अभय-दान, आर्जव और काम्यादि कर्मों से उपरति ॥ ३६३ ॥

सर्वक्रिया-उपरति का फल दिखाते हैं—

यतो यतो निवर्तते ततस्ततो विमुच्यते ।
निवर्तनाद्धि सर्वतो न वेत्ति दुःखमण्वपि ॥ ३६४ ॥

योजना—यतो यतो निवर्तते, ततः ततो विमुच्यते, सर्वतः निवर्तनात् हि अणु अपि दुःखं न वेत्ति ॥ (अनुष्टुप्) ॥

योजितार्थ—जिस-जिस क्रिया से निवृत्त होता जाता है, उस-उस से विमुक्त हो जाता है, समस्त क्रियाओं से निवृत्त हो जाने पर अणुमात्र भी दुःख का अनुभव नहीं करता ॥ ३६४ ॥

वैराग्य-जनक वचन उद्धृत करते हैं—

किं ते धनेन किमु बन्धुभिरेव वा ते
किं ते दारैर्ब्राह्मण यो मरिष्यसि ।
आत्मानमन्विच्छ गुहां प्रविष्टं
पितामहास्ते क्व गताः पिता च ॥ ३६५ ॥

योजना—ब्राह्मण ! यो मरिष्यसि ते धनेन किम् ? ते बन्धुभिः वा किमु ? ते दारैः किम् ? गुहां प्रविष्टम् आत्मानम अन्विच्छ, ते पितामाहः क्व गताः ? पिता च ॥ (उपजाति) ॥

योजितार्थ—हे ब्राह्मण ! तू शीघ्र ही मर जायगा, तेरे धन से क्या होगा ? तेरे बन्धवर्ग से क्या लाभ ? तेरी स्त्रियाँ क्या करेंगी ? बुद्धिरूप गुहा में छिपे उस आत्म-तत्त्व की खोज कर, देख ! तेरे पितामह कहाँ गये ? पिता कहां गया ? ॥ ३६५ ॥

चतुर्विध पुरुषार्थ का कारण दिखाते हैं—

अर्थस्य मूलं निकृतिः क्षमा च
कामस्य रूपं च वयो वपुश्च ।
धर्मस्य यागादि दया दमश्च
मोक्षस्य सर्वोपरमः क्रियाभ्यः ॥ ३६६ ॥

इति श्रीसुरेश्वराचार्यपूज्यपादशिष्यश्रीसर्वज्ञात्ममुनेः
कृतौ शारीरकमीमांसाभाष्यप्रकरण-
वार्तिके संक्षेपशारीरके
तृतीयोऽध्यायः

योजना—अर्थस्य मूलं निकृतिः क्षमा च, कामस्य रूपं वयो वपुश्च, धर्मस्य यागादि दया दमश्च, मोक्षस्य क्रियाभ्यः सर्वोपरमः ॥ (इन्द्रवज्रा) ॥

योजितार्थ—अर्थ का मूल छल और सहिष्णुता, काम का रूप यौवन और सुन्दर शरीर, धर्म का यागादि, दया और दम, मोक्ष का समस्त क्रियाओं से उपरति ॥

भावितार्थ—अर्थ का उपार्जन करने के लिए छल-बल और सहिष्णुता का सहारा लेना पड़ता है । काम की पूर्ति के लिए सुन्दर रूप, भरी जवानी तथा कांचन कलेवर चाहिए । धर्म कमाने के लिए यागादि, दया एवं दम का अनुष्ठान करना अपेक्षित है । मोक्ष के लिए एक ही मार्ग है, वह है—समस्त क्रियाओं से निवृत्ति ॥ ३६६ ॥

तृतीयनेत्रप्रतिपन्नमञ्जसा
विनाशितस्वान्तगकामकिल्बिषम् ।
नमामि मे मञ्जुलमंगलप्रदं
सनातनं ज्योतिरजिह्मजीवितम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसुन्दरदासोदासीन-
पूज्यपादशिष्यश्रीमद्रामानन्दोदासीनविरचितायां
संक्षेपशारीरकभाषाव्याख्यायां
तृतीयोऽध्यायः ॥

◆

❀ चतुर्थोऽध्यायः ❀

सद्यःसमुत्सारितभस्मघस्मरं
समस्तसाधनसाध्यमद्भुतम् ।
तुरीयतत्त्वं चिरलिप्सितं सितं
प्रपद्यते सम्प्रति साम्बशाम्भवम् ॥

[फलजिज्ञासा]

पूर्व अध्याय में कथित समस्त साधनों से संसिद्ध महावाक्य-जन्य बोध से कैसी फल-निष्पत्ति होती है, यह शिष्य पूछता है—

उक्तसाधनसमुद्भवा सती
किं प्रयच्छति फलं मुमुक्षवे ।
प्रत्यगात्ममतिरत्र मे मन-
स्यर्थिता समुपजायतेऽधुना ॥ १ ॥

योजना—उक्तसाधनसमुद्भवा सती प्रत्यगात्ममतिः मुमुक्षवे किं फलं प्रयच्छति, अत्र अधुना मे मनसि अर्थिता समुपजायते ॥ (रथोद्धता) ॥

योजितार्थ—उक्त साधनों से समुद्भूत होकर प्रत्यगात्म-बुद्धि मुमुक्षु को क्या फल देती है, इस विषय की मेरे मन में जिज्ञासा उत्पन्न हुई है ॥

भावितार्थ— श्रवण आदि साधनों का जो फल बताया गया--ब्रह्मज्ञान, उसके विषय में जिज्ञासा होती है कि ब्रह्मज्ञानरूप फल क्या और फलों के समान जन्य है ? या कूटस्थरूप ? ॥ १ ॥

सहकारी कारण के विषय में भी जिज्ञासा होती है—

किं निरस्तसहकारिकारणा
केवलैव फलमर्पयेन्मतिः ।
बाह्यसाधनसहायसंपदा
वान्विता फलविधायिनी भवेत् ॥ २ ॥

योजना—किं निरस्तसहकारिकारणा केवला एव मतिः फलम् अर्पयेत् ? वा बाह्यसाधनसहायसम्पदा अन्विता फलदायिनी भवेत् ? (रथोद्धता) ॥

योजितार्थ—क्या समस्त सहकारी कारणों से रहित होकर अकेली ही प्रत्यगात्मबुद्धि फल देगी ? या बाह्य साधनों की सहायतारूप सम्पत्ति से युक्त होकर फलदायिनी होगी ? ॥ २ ॥

आचार्य अधिक प्रश्नों से ऊब न जाय, इसलिए शिष्य नम्र निवेदन करता है—

एतदप्यहमवैतुमुत्सहे निर्णयं कुरु कृपाविधेयधीः ।
एतदेव हि दयालुलक्षणं यद्विनेयजनबुद्धिवर्धनम् ॥ ३ ॥

योजना–एतदपि अवैतुम् अहम् उत्सहे, कृपाविधेयधीः निर्णय कुरु । एतदेव दयालुलक्षणम्, यद् विनेयजनबुद्धिवर्धनम् ॥ (रथोद्धता) ॥

योजितार्थ–इसे भी जानने के लिए मैं उत्सुक हूँ, कृपया निर्णय कीजिए । यही दयालुओं का लक्षण है कि शिष्य जनों के बोध को बढ़ाना ॥ ३ ॥

गुरु प्रथम प्रश्न का उत्तर देता है—

उच्यते न तमसो निवृत्तितः
किंचिदस्ति परमात्मधीफलम् ।
अन्यदल्पमपि साधनान्तरं
न व्यपेक्ष्य फलदायिनी च धीः ॥ ४ ॥

योजना—उच्यते तमसो निवृत्तितः अन्यत् किञ्चिद् अल्पम् अपि परमात्मधीफलं नास्ति, धीः हि साधनान्तरं व्यपेक्ष्य च फलदायिनी न ॥ (रथोद्धता) ॥

योजितार्थ–अज्ञान की निवृत्ति से भिन्न कुछ भी परमात्मज्ञान का फल नहीं, क्योंकि आत्मज्ञान अन्य साधन की सहायता से फल नहीं देता ॥

भावितार्थ–अविद्या-निवृत्तिमात्र ही विद्या का फल प्रसिद्ध है, अतः अज्ञान-बाधन के अतिरिक्त कुछ भी उत्पाद्य, आप्य, संस्कार्य या विकार्य फल यहाँ नहीं माना जाता ॥ ४ ॥

द्वितीय प्रश्न का उत्तर है—

शुक्तिकाविषयबुद्धिजन्मनः
शुक्तिकागततमोनिवृत्तितः ।
नापरं किमपि दृश्यते फलं
नापरं च सहकारि कारणम् ॥ ५ ॥

योजना—शुक्तिकाविषयबुद्धिजन्मतः शुक्तिकागततमोनिवृत्तितः अपरं किमपि फलं न दृश्यते, अपरं सहकारि कारणं च न (दृश्यते) ॥ (रथोद्धता) ॥

योजितार्थ—शुक्तिकाविषयक बुद्धि-जन्म से शुक्तिकागत तम की निवृत्ति को छोड़ कर अन्य कुछ भी फल नहीं देखा जाता और न अन्य कोई सहकारी कारण ही देखा जाता है ।

भावितार्थ—शुक्तिगत अज्ञानमात्र की निवृत्ति शुक्ति के ज्ञान से देखी जाती है, वहाँ शुक्ति के ज्ञान का और कोई सहायक कारण भी नहीं देखा जाता, अतः अकेला ज्ञान ही अज्ञान का निवर्त्तक माना जाता है ॥ ५ ॥

लौकिक दृष्टान्त में व्याप्ति दिखाकर अभिमत पक्ष में साध्य सिद्ध करते हैं—

एवमात्मनि तमोनिवृत्तितो
नान्यदस्ति परमात्मधीफलम् ।
नाप्यपेक्ष्य सहकारि कारणं
किंचिदात्ममतिरर्पयेत्फलम् ॥ ६ ॥

योजना—एवम् आत्मनि तमोनिवृत्तितः अन्यत् परमात्मधीफलं नास्ति, नापि किञ्चित् सहकारिकारणम् अपेक्ष्य आत्ममतिः फलम् अर्पयेत् ।। (रथोद्धता) ।।

योजितार्थ—इसी प्रकार आत्मा में अज्ञान-निवृत्ति से भिन्न परमात्मबोध का और फल नहीं है और न किसी सहकारी कारण की अपेक्षा करके ही आत्मज्ञान अपने फल का समर्पण करता है ।। ६ ।।

प्राणादि-विद्या के समान ही ब्रह्मविद्या को प्रमाण रूप नहीं माना जा सकता, फिर उससे अज्ञान की निवृत्ति कैसे होगी ? इस शंका का समाधान है—

ब्रह्मज्ञानं प्रमाणं भवति दृढमिदं नात्र कश्चिद्विवादो
ब्रह्मात्मा चैकरूपो न च बहुरसकस्तत्परत्वात् श्रुतीनाम् ।
एवं सत्यद्वयात्मप्रमितिफलमिह द्वैतमूलापनुत्तिः
न ह्यज्ञानापनुत्तेरधिकमपि फलं किंचिदस्ति प्रमाणात् ॥ ७ ॥

योजना—ब्रह्मज्ञानं प्रमाणं भवति—इदं दृढम्, अत्र कश्चित् विवदो न । ब्रह्मात्मा च एकरूपः बहुरसकः न, श्रुतीनां तत्परत्वात्, एवं सति इह अद्वयात्मप्रतीतिफलं द्वैतमूलापनुत्तिः, प्रमाणात् अज्ञानापनुतेः अधिकं किञ्चित् फलं नास्ति ।। (स्रग्धरा) ।।

योजितार्थ—ब्रह्मज्ञान प्रमाण होता है—यह सुदृढ़ है, इसमें कोई विवाद नहीं । ब्रह्मात्मा एक रूप होता है, बहुरूप नहीं, क्योंकि सभी श्रुतियाँ तत्परक हैं, इस प्रकार यहाँ अद्वयात्मबोध का फल द्वैत के मूलभूत अज्ञान का नाश ही है, प्रमाणज्ञान से अज्ञानापनोदन से अधिक कुछ भी फल नहीं होता ।।

भावितार्थ—प्राणादि-विद्या में प्राणादि के अनेक रूपों में उपासना बताई गई है, किन्तु ब्रह्म के विषय में ऐसा नहीं, वह सदा एकरस कूटस्थ है, अतः प्राणादि-विद्या पुरुष-तन्त्र होने से प्रमाण नहीं, अपितु मानसक्रियामात्र है, किन्तु ब्रह्मविद्या वस्तुतन्त्र होने से प्रमाण है, इससे अज्ञान की निवृत्ति के अतिरिक्त और कुछ नहीं होता ।। ७ ।।

ब्रह्म-ज्ञान को सापेक्ष भी नहीं कह सकते—

निरभिसन्धिसमर्पितमच्युते
विहितमिष्टफलादपि निर्गतम् ।
यदपि कर्म तदप्यवधीरितं
यदि धिया न तया परमर्थ्यते ॥ ८ ॥

योजना—यदपि विहितं कर्म अच्युते निरभिसन्धिसमर्पितम्, इष्टफलाद् अपि निर्गतम् तदपि धिया यदि अवधीरितम्, तया परं न अर्थ्यते ।। (द्रुतविलम्बितम्) ।।

योजितार्थ—जो विहित कर्म ईश-चरणों में फलेच्छा-रहित (निष्काम) भाव से समर्पित होता है अर्थात् अपने नियत फल से निर्गत हो जाता है, वह भी जिस बुद्धि (ब्रह्मज्ञान) से अवधीरित (त्यक्त) है, उस बुद्धि को और किसकी अपेक्षा होगी ?

भावितार्थ—ब्रह्मज्ञान का यदि कोई सहकारी कारण माना जाय, तो वह क्या ईश्वरार्पित कर्म होगा ? या और कुछ ? ईश्वरार्पित कर्म की ज्ञान को अपनी उत्पत्ति के समय कथंचित् अपेक्षा हो सकती है, किन्तु फल देते समय उसकी अपेक्षा नहीं; क्योंकि

सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते" (गी० ४।३३) आदि शास्त्र उस कर्म की अनपेक्षता उद्घोषित करते हैं। दूसरा विकल्प भी उचित नहीं, क्योंकि ज्ञान को और किसी की अपेक्षा किसी प्रकार भी सिद्ध नहीं होती ॥ ८ ॥

समुच्चयवादनिरासः

ज्ञान का कर्म के साथ समसमुच्चय या विषमसमुच्चय कुछ भी नहीं बनता—

समविषमसमुच्चयो न युक्तो
न हि जगदस्ति धियः प्रसूतिकाले ।
क्व नु बत विहितक्रियासमूहः
कथमिव तत्र समुच्चयोपपत्तिः ॥ ९ ॥

योजना—समविषमसमुच्चयो न युक्तः, धियः प्रसूतिकाले हि जगत् नास्ति, विहितक्रियासमूहः बत क्व नु ? तत्र समुच्चयोपपत्तिः कथमिव ? (पुष्पिताग्रा) ॥

योजितार्थ—सम और विषम समुच्चय (कुछ भी) नहीं बनता, क्योंकि ज्ञान की उत्पत्ति के समय जगत् है ही नहीं, विहित क्रिया-वर्ग तो कहाँ ? ऐसी परिस्थिति में समुच्चय की उपपत्ति हो ही कैसे सकती है ?

भावितार्थ—मोक्ष की प्राप्ति में ज्ञान और कर्म दोनों का समान प्राधान्य मानना समसमुच्चयवाद है, ज्ञान को प्रधान और कर्म को अप्रधान अथवा कर्म को प्रधान और ज्ञान को अप्रधान मानना विषमसमुच्चयवाद कहलाता है। ज्ञान तथा कर्म का किसी प्रकार का भी समुच्चय नहीं बनता; क्योंकि ज्ञान के जन्म लेते ही समस्त जगत् ही समाप्त हो जाता है, उस समय कर्म की सत्ता ही नहीं रह जाती कि किसी प्रकार उसका समुच्चय ज्ञान के साथ बन सके ॥ ९ ॥

अज्ञानी में ज्ञान और ज्ञानी में कर्म नहीं, अतः भी ज्ञान-कर्म का समुच्चय नहीं—

अपि च परमहंसस्त्यक्तसर्वैषणः सन्
अनुभवफलविद्यां साधनैर्यद्यवाप ।
कथमिव पुनरत्र प्राप्तिरस्ति क्रियाया
भवतु तदपवर्गो विद्ययैवैकयाऽस्य ॥ १० ॥

योजना—अपि च परमहंसः त्यक्तसर्वैषणः सन् यदि साधनैः अनुभवफलविद्याम् अवाप; अत्र पुनः क्रियायाः कथमिव प्राप्तिः अस्ति, तत् अपवर्गः एकया विद्यया एव भवतु ॥ (मालिनी) ॥

योजितार्थ—परिव्राट् ने समस्त एषणाओं का त्याग कर यदि निवृत्ति-साधनों से ब्रह्मात्म-साक्षात्कारफलक विद्या प्राप्त की, तो इस (परिव्राजक) में कर्म की प्राप्ति ही कैसे होगी, अतः अपवर्ग एकमात्र ज्ञान से ही होगा ॥

भावितार्थ—जैसे एक ही स्थान पर एक समय अन्धकार और प्रकाश-जैसे दो विरोधी तत्त्वों का समुच्चय नहीं होता, वैसे ही एक ही व्यक्ति में एक समय ज्ञान और कर्म का समुच्चय सम्भावित नहीं, क्योंकि ज्ञान के होने पर कर्तृत्वादि का अभिमान

समाप्त हो जाता है, उसके बिना कर्म का रहना सम्भव नहीं, जो व्यक्ति पुत्र, वित्त और लोक की एषणाओं (कामनाओं) से बहुत ऊपर ज्ञान की कक्षा में पहुँच चुका है, उसमें भला वे क्षुद्र कामनाएँ रह ही कैसे सकती हैं ? उनके न होने से कर्म का अधिकार ही समाप्त हो जाता है ।। १० ।।

ज्ञान को कर्म का अङ्ग मानने में कोई प्रमाण नहीं—

यस्य प्रयोगविधिरस्ति परिग्रहीता
द्वारैदमर्थ्यविनिवेदकमस्य सर्वम् ।
श्रुत्यादिमानमिह नास्ति तदात्मबुद्धौ
तस्मादियं भवतु नः पुरुषार्थभूता ।। ११ ।।

योजना—यस्य प्रयोगविधिः परिग्रहीता अस्ति, अस्य सर्वस्य श्रुत्यादिमानं द्वारैदमर्थ्यविनिवेदकम्, इह आत्मबुद्धौ तत् नास्ति, तस्माद् इयं नः पुरुषार्थभूता भवतु ।। (वसन्ततिलका) ।।

योजितार्थ—जिस (पदार्थ) की प्रयोग-विधि ग्राहक होता है, उस पदार्थ का श्रुति आदि प्रमाण अङ्गत्व-बोध कराते हैं, इस आत्मज्ञान (की अङ्गता) में कोई प्रमाण नहीं, अतः यह (आत्मबुद्धि) हमारे मत में पुरुषार्थभूत सिद्ध हो जाती है ।।

भावितार्थ—श्रुति, लिङ्ग, वाक्य, प्रकरण, स्थान और समाख्या—इन छह प्रमाणों से विनियुक्त पदार्थ ही कर्म का अङ्ग माना जाता है, आत्मज्ञान के अङ्ग होने में कोई भी प्रमाण नहीं, अतः आत्मज्ञान स्वतन्त्र पुरुषार्थभुत है, कर्म का अङ्ग नहीं, कर्म के साथ इसका समुच्चय कैसे होगा ? ।। ११ ।।

अविद्यानिवृत्तिस्वरूपवर्णनम्

अविद्या-निवृत्ति का स्वरूप दिखाते हैं—

सदसत्सदसद्विकल्पित-
प्रतिपक्षैकवपुर्निवर्त्तनम् ।
तमसोऽभ्युपगम्यतेऽन्यथा-
नुपपत्त्यापतनैकहेतुतः ।। १२ ।।

योजना—तमसो निवर्तनं सदसत् सदसद्विकल्पितप्रतिपक्षैकवपुः अन्यथानुपपत्यापतनैकहेतुतः अभ्युपगम्यते ।। (सुन्दरी) ।।

योजितार्थ—अज्ञान की निवृत्ति सत्, असत्, उभय और अनुभय—इन विकल्पों से भिन्न (पञ्चम प्रकार) अन्यथानुपपत्ति के आधार पर मानी जाती है ।।

भावितार्थ—अविद्या-निवृत्ति को न सत् माना जा सकता है, न असत्, न सदसत् उभयरूप और न सदसत् उभय-विलक्षण, अपितु इन चारों प्रकारों से भिन्न पञ्चम प्रकार ही संगत है, क्योंकि सत् मानने पर द्वैतापत्ति होती है, असत् मानने पर ज्ञान ही व्यर्थ हो जाता है, सदसत् उभय पक्ष तो परस्पर विरुद्ध होने से सम्भव ही नहीं, उभय-विलक्षण मानने पर अज्ञान को सत्य मानना पड़ेगा ।। १२ ।।

पञ्चम प्रकार मानने में कोई आपत्ति नहीं—

सदसत्सदसद्विकल्पित-
प्रतिबद्धा न भवन्ति वर्णिते ।
परमात्मतमोनिवर्तनेऽ-
नुपपत्तिप्रतिभासवृत्तयः ॥ १३ ॥

योजना—वर्णिते परमात्मतमोनिवर्तने सदसत्सदसद्विकल्पितप्रतिबद्धाः अनुपपत्तिप्रतिभासवृत्तयः न भवन्ति ॥ (सुन्दरीच्छन्दः) ॥

योजितार्थ—कथित अज्ञान-निवृत्ति के (पञ्चम प्रकार) पक्ष में सत् आदि चार पक्षों से सम्बन्ध रखनेवाले अनुपपत्तिरूप दोष नहीं होते ॥

भावितार्थ-कथित चार पक्षों के दोषों से बचने के लिए ही उनका निषेधमात्र कर दिया जाता है, पञ्चम प्रकार का और कोई वैध स्वरूप स्थिर नहीं किया जाता ॥१३॥

पञ्चम प्रकार मानने में वृद्ध-सम्मति भी दिखाते हैं—

चितिभेदमभेदमेव वा
द्वयरूपत्वमथो मृषात्मताम् ।
परिहृत्य तमोनिवर्तनं
प्रथयन्ते खलु मुक्तिकोविदाः ॥ १४ ॥

योजना—मुक्तिकोविदाः चितिभेदम्, अभेदमेव वा द्वयरूपत्वम, अथो मृषात्मतां परिहृत्य तमोनिवर्तनं प्रथयन्ते ॥ (सुन्दरी) ॥

योजितार्थ—मुक्ति-विचार के पण्डितगण चैतन्य-भेद, चैतन्याभेद, भेदाभेद, और मिथ्यारूपता का परिहार करके अज्ञान-निवृत्ति को (पञ्चम प्रकार) कहा करते हैं ॥

भावितार्थ—अज्ञान-निवृत्ति चैतन्य से न भिन्न है न अभिन्न, न भिन्नाभिन्न और न उभय-विलक्षण—इस रीति से पञ्चम प्रकार ही पूर्वाचार्य मानते आये हैं ॥ १४ ॥

निवृत्ति के दो अर्थ वेदान्त-सिद्धान्त में प्रचलित हैं—(१) नाश और (२) बाध। प्रथम अर्थ को दृष्टि में रखकर अविद्या-निवृत्ति को पञ्चम प्रकार बताया। दूसरे अर्थ को सामने रखकर सिद्धान्त स्थिर किया जाता है—

अथवा चितिरेव केवला
वचनोत्पादितबुद्धिवर्त्मना ।
परमात्मतमोनिवृत्तिगी-
र्विषयत्वं समुपैत्युपाधिना ॥ १५ ॥

योजना—अथवा केवला चितिरेव वचनोत्पादितवर्त्मना उपाधिना परमात्मतमोनिवृत्तिगीर्विषयत्वं समुपैति ॥ (सुन्दरी) ॥

योजितार्थ—अथवा केवल (निर्विशेष) चेतन ही वाक्योत्थ बुद्धिवृत्तिरूप उपाधि के द्वारा "तमोनिवृत्तिः" इस शब्द की विषयता को प्राप्त करती है ॥

भावितार्थ—सर्व बाधावधिभूत ब्रह्म ही अज्ञान का बाधस्वरूप है। प्रत्येक वस्तु के अज्ञान का बाध अधिष्ठानज्ञान से होता है, अतः प्रपञ्च-सहित अज्ञान का बाध ब्रह्मज्ञान होने के कारण, ब्रह्मज्ञान या ब्रह्म को ही अविद्या की निवृत्ति कहा जाता है ॥ १५ ॥

लौकिक दृष्टान्त से उक्त सिद्धान्त स्थिर करते हैं—

शुक्तिकाविषयबुद्धिजन्मना
प्रत्यगात्मचितिरेव केवला ।
शुक्तिकागततमोनिवृत्तिरि-
त्युच्यते दृतिहरिः पशुर्यथा ॥ १६ ॥

योजना—शुक्तिकाविषयबुद्धिजन्मना केवला प्रत्यगात्मचितिः एव शुक्तिकागतमोनिवृत्तिः—इत्युच्यते, यथा दृतिहरिः पशुः ॥ (सुन्दरी) ॥

योजितार्थ—शुक्तिविषयक बुद्धिवृत्तिरूप उपाधि के द्वारा शुद्ध चेतन ही शुक्ति-विषयक अज्ञान की निवृत्ति कहा जाता है, जैसे कि 'दृतिहरि' शब्द (पशुत्वरूप उपाधि के द्वारा पशु को ही कहता है) ॥

भावितार्थ—शुक्ति आदि जड़ पदार्थ रजत आदि के अधिष्ठान नहीं बन सकते, अतः शुक्ति-उपहित चेतन को ही उसका अधिष्ठान मानना होगा, वही शुक्तिविषयक प्रमावृत्तिरूप उपाधि के द्वारा शुक्तिविषयक अज्ञान की निवृत्तिरूप है ॥ १६ ॥

कथित 'दृतिहरि' दृष्टान्त को स्पष्ट करते हैं—

वाचको हरणकर्त्तुरिष्यते
शब्द एष हि दृतेर्मनीषिभिः ।
केवलं तु पशुता निमित्ततां
बाह्यतः स्थितवती व्रजेदियम् ॥ १७ ॥

योजना—मनीषिभिः एष (दृतिहरिः) शब्दः दृतेः हरणकर्त्तुः वाचकः इष्यते, इयं पशुता तु बाह्यतः स्थितवती केवलं निमित्तितां व्रजेत् ॥ (रथोद्धता) ॥

योजितार्थ—मनीषिगण इस "दृतिहरि" शब्द को दृति (चमड़े की थैली) के ढोने-वाले का वाचक मानते हैं, यह 'पशुता' तो (वाच्यकोटि के) बाहर ही स्थित रह कर केवल निमित्त ही होती है ॥

भावितार्थ—दृति (चमड़े के थैले) को जो भी मनुष्य या अश्व या और कोई वहन करता है, वही यौगिक वृत्ति से 'दृतिहरि' शब्द का वाच्य होता है, किन्तु मनीषिगण इस 'दृतिहरि' शब्द का प्रयोग केवल अश्व आदि पशु अर्थ में ही किया करते हैं, अतः 'पशुत्व' यहाँ ऐसी उपाधि है, जो वाच्य-कोटि में किसी प्रकार भी प्रविष्ट नहीं, इसी प्रकार प्रकृत में भी ॥ १७ ॥

दृष्टान्त में वही घटाते हैं—

एवमेव तु तमोनिवृत्तिगीः
शुक्तिकाविषयबुद्धिजन्मना ।
बाह्यतः स्थितवतैव हेतुना
प्रत्यगात्मचिति वर्त्ततेऽञ्जसा ॥ १८ ॥

योजना—एवमेव तमोनिवृत्तिगीः शुक्तिकाविषयबुद्धिजन्मना बाह्यतः स्थितवता हेतुना एव प्रत्यगात्मचिति अञ्जसा वर्तते ॥ (रथोद्धता) ॥

योजितार्थ—इसी प्रकार शुक्ति में 'अज्ञान-निवृत्ति' शब्द शुक्तिविषयक बुद्धि-वृत्तिरूप बहिष्ठ निमित्त के द्वारा चैतन्य में मुख्यवृत्ति से ही प्रवृत्त होता है ॥ १८ ॥

प्रकृत में वही सिद्ध करते हैं—

उत्पन्नशुक्तिमतिरात्मचितिर्यथैव
शुक्तेस्तमोहतिरिति प्रतिपन्नमेवम् ।
आत्माऽपि जातनिजबुद्धिरबोधहानि-
रित्युच्यतेऽमलचिदेकरसो न पूर्वम् ॥ १९ ॥

योजना—यथा उत्पन्नशुक्तिमतिः चितिः शुक्तेः तमोऽपहृतिः—इति प्रतिपन्नम्, एवम् अमलचिदेकरसः आत्मा अपि जातनिजबुद्धिः अबोधहानिः—इत्युच्यते, पूर्वो न ॥ (वसन्ततिलका) ॥

योजितार्थ—जैसे उत्पन्न शुक्तिविषयक बुद्धिवृत्तिरूप उपाधिवाला चेतन शुक्ति के अज्ञान की निवृत्ति कहा जाता है, वैसे ही निर्मल, चिदेकरस आत्मा ही स्वविषयक बुद्धिवृत्तिरूप उपाधि के द्वारा अज्ञान-निवृत्त कहा जाता है, बुद्धि-जन्म के पूर्व का आत्मा नहीं ॥

भावितार्थ—महावाक्य-जन्य बुद्धि-वृत्ति के होने से पूर्व चेतन को अज्ञान-निवृत्तिरूप नहीं माना जा सकता अपितु पश्चात्, इसीलिए उक्त वृत्ति को उपाधि माना जाता है, वह तटस्थ रहकर उक्त चेतन की परिचायक मानी जाती है ॥ १९ ॥

'दृतिहरि' शब्द के प्रयोग की कथित पशुत्व उपाधि में युक्ति देते हैं—

दृतिहरणकर्तृत्वं पुंसि चान्यत्र चेदं
दृतिहरिरिति लोके नोच्यते वर्तमानम् ।
अनधिकविकलं सत्कथ्यते तत्पशुस्थं
दृतिहरिरिति शिष्टैर्बाह्यहेतोः पशुत्वात् ॥ २० ॥

योजना—पुंसि अन्यत्र च वर्तमानम् इदं दृतिहरणकर्तृत्वं 'दृतिहरिः'—इति लोके न उच्यते, पशुत्वात् बाह्यहेतोः पशुस्थं तत् अनधिकविकलं सत् 'दृतिहरिः'—इति शिष्टैः कथ्यते ॥ (मालिनी) ॥

योजितार्थ—पुरुष में (तथा रथ आदि में) वर्तमान यह दृति-हरण-कर्तृत्व 'दृतिहरि' शब्द से लोक में नहीं कहा जाता, किन्तु पशुत्वरूप बाह्य निमित्त के कारण पशुमात्र में वर्तमान वह (दृतिहरणकर्तृत्व) अन्यूनानतिरिक्त होकर 'दृतिहरि' शब्द से शिष्ट पुरुषों के द्वारा कहा जाता है ॥

भावितार्थ—शिष्ट पुरुषों के प्रामाणिक प्रयोगों के आधार पर शब्द का स्वभाव स्थिर किया जाता है । 'दृतिहरि' शब्द का प्रयोग शिष्टगण पशु में ही किया करते हैं, अतः पशुवृत्ति दृतिहरण-कर्तृत्व ही 'दृतिहरि' शब्द का वाच्य होता है, सामान्यतः दृतिहरण-कर्तृत्व नहीं, क्योंकि "हरतेर्दृतिनाथयोः पशौ" (पा० सू० ३।२।२५) इस सूत्र में वैसा स्पष्ट कर दिया है ॥ २० ॥

प्रकृत में भी वही युक्ति है—

अयमपि परमात्मा प्रत्यगात्मस्वभावो
वचनजनितबुद्धेः प्राक्स्वरूपे स्थितोऽपि ।
न खलु विषयभावं ध्वान्तविच्छेदवाचो
व्रजति हि तदुपाधेर्बुद्धिवृत्तेरभावात् ॥ २१ ॥

योजना—वचनजनितर्बुद्धेः प्राक् स्वरूपे स्थितोऽपि अयं प्रत्यक्स्वभावः परमात्मा ध्वान्तविच्छेदवाचः विषयभावं न व्रजति, हि बुद्धिवृत्तेः तदुपाधेः अभावात् ॥ (मालिनी)॥

योजितार्थ—महावाक्य-जन्य बुद्धि-वृत्ति के पूर्व स्वरूपतः स्थित होने पर भी यह प्रत्यगात्मस्वरूप परमात्मा 'अज्ञान-निवृत्ति' शब्द का विषय नहीं होता, क्योंकि बुद्धि-वृत्तिरूप उपाधि का अभाव है ॥

भावितार्थ—उपाधि की उत्पत्ति से पूर्व उपधेय में कोई भी उपाधि-प्रयुक्त व्यवहार नहीं होता, अतः जब तक महावाक्य-जन्य बुद्धि-वृत्ति उत्पन्न नहीं होती, तब तक उस अधिष्ठान चेतन को 'अज्ञान-निवृत्ति' शब्द से नहीं कहा जा सकता, अपितु उस उपाधि के जन्म के पश्चात् ही ब्रह्म को अज्ञान-हानि माना जाता है ॥ २१ ॥

'अज्ञान' आदि शब्दों के साथ समस्यमान 'नाश, निवृत्ति' आदि शब्द अभाव के वाचक नहीं होते—

अज्ञानदाह इति नैकपदं समासात्
पूर्वोत्तरे खलु पदे पदतामुपेतः ।
ज्ञानोदयं तटगतं समुपाददानः
तस्मात्तमोहतिरवोऽत्र चिति प्रवृत्तः ॥ २२ ॥

योजना—'अज्ञानदाहः' इति एकपदं न, समासात् खलु पूर्वोत्तरे पदे पदताम् उपेतः, तस्मात् ज्ञानोदयम् तटगतं समुपाददानः अत्र तमोहतिरवः चिति प्रवृत्तः ॥ (वसन्तति०)॥

योजितार्थ–'अज्ञानदाह' यहाँ एक पद नहीं, अपितु समास होने से ही पूर्व (अज्ञान) तथा उत्तर (दाह) पद मिलकर पदभाव को प्राप्त हुए हैं, इसलिए ज्ञानोदयरूप तटस्थ उपाधि को लेकर यहाँ 'तमोहति' शब्द चेतन में प्रवृत्त हुआ है ॥

भावितार्थ—"अज्ञानस्य दाहः, अज्ञानदाहः, अज्ञानस्य दाहो यत्र स अज्ञानदाहः" आदि समास वृत्तियों के कारण शब्दों की अन्य अर्थ में भी प्रवृत्ति देखी जाती है, इसी प्रकार यद्यपि 'नाश' शब्द अभाव का ही वाचक होता है, तथापि 'अज्ञान' शब्द से समस्त हो जाने के कारण अभाव अर्थ को न कहकर यहाँ चैतन्यरूप भाव अर्थ को कहने लगा है ॥ २२ ॥

'दृतिहरि' शब्द का भी समास के कारण ही उक्त विशेष अर्थ माना जाता है—

अत्राप्यसौ दृतिहरिः पशुरित्यखण्डः
शब्दो न खल्वभिमतोऽवयवार्थयोगात् ।
धातुश्च वाचकतया हरतिः प्रसिद्धो
हीन्प्रत्ययश्च हरतेः परतः प्रसिद्धः ॥ २३ ॥

योजना—अत्रापि असौ दृतिहरिः पशुः—इति अखण्डशब्दो न खलु अभिमतः, अवयवार्थयोगात्, हरति धातुः हि (हरतेः) वाचकतया प्रसिद्धः हरतेः परतः इन् प्रत्ययश्च (कर्तृवाचकतया) प्रसिद्धः ।। (वसन्ततिलका) ।।

योजितार्थ—यहाँ भी 'दृतिहरि' शब्द अखण्ड (पद) नहीं माना जाता, क्योंकि अवयवों के भिन्न-भिन्न अर्थ होते हैं, अर्थात् 'हृञ्' धातु हरण की वाचक प्रसिद्ध है और 'हृञ्' धातु के उत्तर 'इन्' प्रत्यय कर्तृवाचक प्रसिद्ध है ॥ २३ ॥

अज्ञाननिवृत्तिसमयनिर्णयः

ज्ञान की उत्पत्ति के समय ही अज्ञान की निवृत्ति होती है ? या उत्तर काल में ? इस प्रश्न का उत्तर देते हैं—

उद्यन्निरस्यति तमश्च तदुद्भवं च
वेदावसानवचनादथ वोधितः सन् ।
ऐकात्म्यवस्तुविषयोऽनुभवतोऽत एव
कंचित्सहायमनपेक्ष्य निवर्त्तकोऽसौ ॥ २४ ॥

योजना—ऐकात्म्यवस्तुविषयः अनुभवः वेदावसानवचनात् उद्यन् एव अथवा उदितः सन् तमः तदुद्भवं च निरस्यति, असौ किञ्चित् सहायम् अनपेक्ष्य निवर्तकः ।। (वसन्त०)।।

योजितार्थ—एकात्मतावस्तुविषयक अनुभव वेदान्त-वाक्य से उत्पन्न होते ही अथवा उत्पन्न होकर अज्ञान और अज्ञानोद्भूत प्रपञ्च का नाश करता है, यह (अनुभव) किसी सहायक की अपेक्षा न करके ही (अज्ञान का) निवर्तक होता है ।।

भावितार्थ—ज्ञान अपने उदय-काल में अथवा उत्तर क्षण में अज्ञान का नाशक होता है, सर्वथा ज्ञान के उत्तर क्षण में अज्ञान नहीं टिक सकता, क्योंकि ज्ञान अपने विरोधी अज्ञान को नष्ट करने में और किसी को अपेक्षा या प्रतीक्षा नहीं करता कि अज्ञान का नाश होने में विलम्ब हो ।। २४ ।।

यही बात दृष्टान्त से स्पष्ट करते हैं—

दीपस्तमस्तिरयतीह भवत्कुतश्चिद्
भूत्वा क्षणव्यवधिमात्रमपेक्ष्य नात्र ।
कश्चिद्विवादपदवीमुपयाति वादी
तद्वत्प्रतीच्यवगतौ तमसोऽपहन्त्र्याम् ॥ २५ ॥

योजन—दीपः भवत् कुतश्चित् भूत्वा क्षणव्यवधिमात्रम् अपेक्ष्य तमः तिरयति–अत्र कश्चित् वादी विवादपदवीं न उपयाति, तद्वत् तमोऽपहन्त्र्यां प्रतीच्यवगतौ ।। (वसन्त०)।।

भावितार्थ—दीपक उत्पन्न होते ही या किसी प्रतिबन्ध के कारण उत्पन्न होकर एक क्षण के व्यवधान मात्र से अन्धकार को नष्ट करता है–इसमें कोई भी वादी विवाद नहीं करता, वैसे ही अज्ञान-नाशक प्रत्यगात्मावगति (के विषय में जोड़ लेना चाहिए) ।।२५।।

मुख्य सिद्धान्त दिखाते हैं—